जलंपीत्वातमंशुभं सकृदाचम्यविधिवत्सौरमंत्राभिमंत्रितं पिवेच्छुद्धमनावि
प्रसूर्य्यलोकसमाप्नुयात् ततोवामप्रदेशेवैशिवलिंगमनुत्तमं १८ दृष्ट्वासं
स्नाप्यगांगेनतोयेनशिवमाप्नुयात् तत्रैकासलिलानाम्नीसुरकन्यासुराच्चिका
१९ मध्याह्नेनित्यमायातिपूर्णचन्द्रनिभानना भविद्वीसापरेकल्येशचीदेवप
तिप्रिये २० पितृभ्योयवपृष्टस्यपिंडान्दद्याद्विचक्षणः तारितास्तेनपितरो
दशपूर्वादशापराः २१ ततोतिनिकटेवामेनिवर्त्तनमितस्थले मुण्डमालेश्वरीदे
वीउग्रमथोत्करशोभिनी २२ यस्यादर्शनमात्रेणसर्वसिद्धीश्वरोभवेत् नानावा
द्यमयाःशब्दाःश्रूयंतेदेवताहता २३ तत्रपीठेश्वरीदेवीसर्वभूतमनोहराः तस्मिं
स्थानेतुयोमर्त्त्योधीरात्माद्रढनिश्चयः २४ नकार्य्याभीस्ततोविप्रप्रइच्छेच्छ्रेयत्रा
त्मनः दद्यातिदर्शनंतस्यमुण्डमालीश्वरीशिवा २५ नानारूपधरास्तत्रदृश्यंतेप्रम

मा०पु० ध्यात्विय: पुरश्चर्य्यांचविधिवत्सन्नरात्वंजितेन्द्रिय: २६ असाध्यमपिसन्नाहा
२८ त्साधयेत्साधकोत्तम: तस्यहस्तिगतोविप्रसिद्धिलापीतत्तमाकिल २७ आश्चर्य्यं
दृश्यतेतत्रशयनात्पूर्वजन्मयत् यस्मिन्कुलेचयोनौचजातंपूर्वंतपोनिधे २८
ज्ञानातिशयनातत्रयदिजीवतिमानव: इतिगुह्यतमान्येवकथितानितवाऽ
धना २९ पित्रो:श्रुतानिमेयानियदृतोवैपरस्परं गोपनीयंप्रयत्नेनकलौबु
द्धिविवर्जितान् ३० इतिस्कान्देमायापुरीमाहात्म्येऽष्टमोऽध्याय:॥ ८ ॥
नारदउवाच हरिद्वारेमहाभागकानितीर्थानितानिमेकथयस्वप्रसादेनमुक्तिदा
निविनाव्रते: १ स्कन्दउवाच शृणुनारदवक्ष्यामिलोकानिमुक्तिकारणं स
कृत्स्नातंतुयैर्मर्त्यैर्गंगाद्वारेशुभावहे २ नतस्यपुनरावृत्ति:कल्पकोटिशते रामः
ष्वपि गंगाद्वारसमंतीर्थंनकैलाससमोगिरि: ३ वासुदेवसमोदेवोनगंगास २८

दृशंपरं नगोत्कृष्टंनसमोदानंत्रिषुलोकेषुविद्यते ४ शृणुदिव्यांकथांपुण्यांगं
गाद्वाराश्रितांशुभां पुरात्रेतायुगेभूद्भोवभूवविजयेपरे ५ नाम्नाशंबुकइति
विख्यातोविप्राश्रमोमुने सेवार्थंसार्थलग्नोवैएकाकीशुभतत्परः ६ गंगाद्वा
रेशुभक्षेत्रेदेवर्षिगणभूषिते शकटानडुद्वृषभनियोगेकुशलोमुने ७ आ
ययौवत्सनीतत्रशंबुकोनामशूद्रकः दृष्टास्तेनात्रमुनयोधनिनश्चनृपातथा
८ कौतुकार्थंपर्यटंतनसर्वत्रमुनिवंदितः पुण्यक्षेत्रेक्षणान्नस्यपापंसर्वंक्षयं
गतं ९ निःकल्मषोभवच्छुद्रोज्ञानवान्समजायतः अधिकारविहीनस्यशूद्र
स्यापिमहामते १० रामभद्रस्यभगवद्देवतारस्यसन्निधो बभूवमरणंतस्यमु
क्तिंपापनिवर्त्तिनी ११ दर्शनाद्यस्यपुण्यस्यक्षेत्रस्यपरमांगतिं शूद्रोपिप्राप
यौतत्रकिमन्यब्राह्मणादयः १२ दृष्टामायापुरीपुण्यास्नात्वाचब्रह्ममंदिरे

मा॰पु॰ वाराणसीं लभेदेते सत्यं सत्यं हि नारद १३ त्रिषु स्थानेषु ये मर्त्या निवसंति
महामुने गंगाद्वारे तथा काश्यां गंगासागरसंगमे १४ न तेषां पुनरावृत्तिः क
२९ ल्पकोटिशतैरपि धन्यानां पुरुषाणां हि गंगाद्वारस्य दर्शनं १५ विशेषतस्तु
मेषार्कसंक्रमे तीव पुण्यदं तथापि कुंभराशिस्थे वाक्यतोऽसुरवंदिते १६
अयने विषुवे चैव संक्रांतौ चन्द्रसूर्ययोः ग्रहणे चाव्यतीपाते पूर्णिमायां म
हामुने १७ सोमवारान्वितायां वा यस्यां कस्यामथापि वा अमायां च तथा मा
घे वैशाखे कार्तिकेपि वा १८ तिस्रः कोट्योर्द्धकोटी च तीर्थानां मुनिसत्तमः म
जंते सन्निधिं तत्र स्नातः सर्वत्र जायते १९ क्षेत्राणां पंच कं पृथ्व्यां ख्यास्यति
प्रवरे कलौ गंगाद्वारं च केदारं काशी गंगागमस्तथा २० गंगा च संगता यत्र रामः
सागरेण महामते गंगापि ख्यास्यते त्रैव सत्यमेतद्द्विवेरितं २१ अत्र स्नाते २९

धिकारीस्याद्धंतुकेदारसन्निधौ तस्मात्सर्वप्रयत्नेन स्नायाद्दत्तमवेक्षया २२
खलः कोनाममुक्तिंवैभजतेतत्रमज्जनात् अतः कनखलंतीर्थंनामाचक्रुर्मु
नीश्वराः २३ नारद उवाच कथमेतत्समुत्पन्नं कः खलोमुक्तिमापसः एतत्स
र्वंसमासेनमहासेनवदस्वमे स्कन्द उवाच शृणुविप्रपुराहत्तांकथांपापप्र
णाशिनीं पुरागंगलपुरे विप्रोधर्मकेतुर्वभूवह २४ धर्मात्मासत्यसंकल्पोवि
द्वान्दीनजनाश्रयः नित्यंदीनांस्तथामूकान्वृद्धानांश्रयवर्जितान् २६ भोजयि
त्वास्वयंभुंक्ते दारैः पुत्रैस्तथावृतः एकदाजडमूर्तिर्वैब्राह्मणोवाग्विवर्जितः २७
पश्चबुद्धिर्हीनश्च न्योदृषदात्माययापरः क्षुत्पिपासापरिश्रानमात्रंवेत्तिनचा
परं २८ आययौसतुधया विप्रोधर्मकेतुर्गृहे मुने जगाद संज्ञयातूर्णहस्तयोर्भोजना
यवै दत्तंचतेनविप्रेणभोजनंभोजनोत्तमं अनन्यगतयेतस्मैददावेवंमहामते ३०

मा॰पु॰ भोजनेच्छादनेचैवधर्मकेतुर्महायशाः कदाचिद्दैवयोगेनमायापुर्य्यांसमाययौ ३१
सोपिमूर्खोशनापेक्षोत्तानश्रान्तोमहामुने नैतस्यस्वपरंज्ञानंभक्ष्याभक्ष्येनविद्यते ३२
३० अगम्यागमनेनैवनेवपानेतथैवच मार्गेस्पर्शात्परिभ्रष्टोयवनैःसंगतोऽभवत् ३३
तत्रापितिलद्रामुंकंभस्यंचभ्रष्टबुद्धिना एवंकर्मगणम्केनपैर्यवनोन्मादशालिना ३४
संगमश्चकृतंतेननीचयाद्दुहितृणात्मजः नीचसंगतिकंविद्योमत्वायावयवनमाः
३५ आययौकनखलेतीर्थेमुनिवृन्दसमाश्रिते विप्रवेषंकृतेपण्यधर्मात्मम
ज्जनायवै ३६ गतःकनखलेतीर्थेस्नातश्चाधर्मपीडितः सार्थलग्नःपुनर्विप्राः
त्पुर्य्यांसमाययौ ३७ कालेनकालमापन्नोययौसपरमंपदं यांगतिंयोगमा
पन्नायांगतिंधर्मशीलिनः ३८ यांकाशीमरणाद्यातिप्राप्यत्तांगतिमुत्तमां तीर्थे राम
स्नानप्रभावेनभक्त्यापिरहितोपिसः ३९ ज्येष्ठमासिसितेपक्षेदशम्यांस्नानमाचरेत् ३०

योनरःश्राद्धहीनःस्यात्तस्यनोवर्द्धतेप्रजाः मृतेनरकमाप्नोतितस्माच्छ्राद्धंनसंत्य
जेत् १५ तीर्थमागत्ययोमर्त्यःश्राद्धकर्मविवर्जितः सर्वतीर्थफलंव्यर्थंजी
विनात्तस्यहेमुने १६ तस्माच्छ्राद्धंपरोभूयात्तीर्थकापिगृहेतथा धन्यानांमानु
षेजन्मतत्रोहिहिमवत्स्थले १७ मायापुर्य्यांहितत्रापितत्रभक्तिमतांकुले वे
दाध्ययनकर्माणितथायज्ञादिकाःक्रियाः १८ पृथ्वीपर्यटनंवापिस्नानंसाग
रसंगमे मायापुरीतियासम्यकुकलांनार्हन्तिषोडशीं १९ तेनतत्रहुतंतेनत
प्तंदत्तावसुंधरा तेनसर्वंकृतंकर्ममुक्तिद्वारपदंमुने २० येनात्रविदुषेदत्ता
गौःस्वर्गीयफलप्रदा यावन्तितच्छरीरस्यरोमाणिमुनिपुंगव २१ तावत्कल्प
सहस्राणिस्वर्गलोकेमहीयते धन्याःकलियुगेघोरेयेगांदास्यंतितत्रवै २२
एकत्रसर्वदानानिगोदानंचपरंमुने तुलयासंधृतेचैवगोदानंचाभवद्गुरुः २३

सा॰पु॰ अनमन्तापियोमर्त्योगोभ्योदानेदीनवत्सलः सोपिस्वर्गमवाप्नोतियावदिन्द्राश्चतु
र्दश समुद्राश्चचतुःपल्लरोमकूपेषुदेवताः सर्वतीर्थानिचतथाह्यंगेषुसरित
३२ स्तथा २५ तस्मात्पृथ्वीसमाज्ञेयाधेनुर्धन्यतमाभुवि पुराकल्यादिकेविप्रजग
द्दग्धुमयेसति २६ वेदहीनंजगत्सर्वंनष्टयज्ञंबभूवह दृष्ट्वासर्वास्तथालो
कान्ब्रह्मालोकपितामहः २७ चिन्ताविष्टमनाजातोनचवर्द्धयतःप्रजाः यज्ञा
द्भवन्तिपर्जन्यःपर्जन्यादन्नसंभवः २८ अन्नाद्भवंतिभूतानिस्थावराणिचरा
णिच यज्ञोनजायतेविप्रसर्पिषारयतोयतः २९ सर्पियोनिःस्मृताधेनुः
तदभावेखिलंगतं तस्माद्भावःप्रसृष्ट्यामयासंसारहेतवे ३० इतिचिंतय
तस्तस्यपद्मयोनेर्महात्मनः मतिरासीन्महामायांस्तोतुन्तारदभक्तितः ३१ रामः
ब्रह्मोवाच महामायांनमस्यामिधर्मकर्मार्थमोक्षदां नन्दनाद्रिलतावासांधर ३२

णींजगतांप्रभुं ३२ नारायणींभद्रकालींभद्रांवीरवंदितां यज्ञासिनींयज्ञ
देहांयज्ञपालनतत्परां ३३ त्रिशक्तिंत्रिगुणाराध्यांगुणातीतांगुणाकरां नैमि
षारण्यनिलयांमलयाचलसंश्रयां ३४ वीरभद्रवरांवीरांवीरासनसमास्थितां
स्वाधिष्ठानांबुजरजःपुंजपुंजरितोरवगां ३५ शिवांसरस्वतींलक्ष्मींसिद्धिंबुद्धिंम
होत्सवां केदारवासस्तुभगांबदरीसनरप्रियां ३६ राजराजेश्वरींदेवींसृष्टिसंहा
रकारिणीं मायांमायास्थितांवामांवामशक्तिमनोहरां ३७ मेनकांमनुपूज्यांचे
ज्वालांज्वालामुखीपुरां एकलिंगकृतोत्संगांनारायणपरायणां ३८ भागीरथीं
भाग्यगम्यांभोगिनीभोगवल्लभां भूरादिकृतपोतस्थांवीणापुस्तकधारिणीं ३९
दारुमूर्त्तिसमासीनांश्रियंपीनपयोधरां केयूरांगदभूषाढ्यांचतुर्बाहुमनोहरां ४०
सिंहासनकृतावासांरत्नवस्त्रांरणप्रियां आर्य्यांकार्य्यकरींवन्देसंसारोद्भवहेतवे ४१

मा०पु० इतिसंस्तुवतस्तस्यब्रह्मणोविष्णुजन्मनः कोटिसूर्य्यप्रतीकाशादेवीप्रादुरभून्मुने
४२ उवाचवचनंदिव्यंब्रह्माणंकमलोद्भवं किमर्थंसंस्तुताब्रह्मन्किंकार्य्यंकरवा
३२ णिते ४३ नवध्यंदर्शनंमेस्तिकृतंयत्स्तवनंत्वया प्रसन्नास्मिनसंदेहोभक्तिमा
नसिस्तवतः ४५ ब्रह्मोवाच सृष्टिमार्गप्रदात्वंहिप्रकृतिःपरमात्मना त्वदिच्छया
जगत्सर्वंजायतेसचराचरं ४६ प्रजाःसृष्टामयासर्वाविष्णुगणागुणावर्जिते नवर्द्ध
तेविनाभागंयेनभागाशनाःसुराः ४७ नवैवर्षतिपर्जन्यस्ततोनन्नावतिष्ठति
उपायंकुरुदेवेशियथास्यादन्नसंभवः ४८ श्रीदेव्युवाच शृणुवत्सयथावद्धिप्रो
च्यतेतवजन्मया स्वस्वभागान्हुताःसर्वेददंतुकार्य्यसिद्धये ४९ अहंचतेनरूपे
णभविष्यामिमहीतले मत्तःसर्वंसुरश्रेष्ठभविष्यतिनसंशयः ५० स्कन्दउवा रामः
इतिश्रुत्वावचस्तस्याःसर्वेदेवाःसवासवाः स्वंस्वंभागंभागासिद्धोदइत्तेजोमयंशुभं ५१ ३२

सापि मायाभगवती गृहीत्वा भागमुत्तमं निममज्ज क्षीरनिधौ पश्यतां त्रिदिवौकसां ५२
आश्चर्य्यपरमं लेभुर्दृष्ट्वा तत्कौतुकं महत् किं किमेतत्किं किमेतदिति प्रोचुः सुरा ते
या ५३ एतस्मिन्नन्तरे देवा कुर्व... ...भूवमुनिसत्तमः वायुरुवाच भो भो सु
राः किमर्थं हि क्लेशं प्राप्ता महदाश्रितं म... ...थध्वमेनं सुभगाः पयोधिं कार्यसिद्धये
अन्योन्यमिमं महाभागाः प्राक्पश्यथ प्रवराणि मे ५५ स्कन्द उवाच इति श्रुत्वा वच
स्तस्य दृष्ट्वा ते त्रिदिवौकसः ममन्थुर्मिलितास्तत्र पयोधिं कार्यगौरवात् ५६ मंथा
नं मंदरं कृत्वा नेत्रं कृत्वा तु वासुकिं कूर्मरूपो हरिस्तत्र सर्वशक्तिधरः प्रभुः ५७
मथिते दुग्धनिलये जातान्यन्यान्यपि क्रतोः कामधेनुस्ततो उत्पन्ना सर्वदेवांशसं
भवाः दृष्ट्वा तां निर्जराः सर्वे जियेत्यूचुर्मुदान्विताः गृहीत्वा तां ततो धेनुं ब्रह्मलो
कं ययुर्मुने ५९ पूजयामासुरत्यन्तं षद्दसिणाक्रमादिभिः सापूजिता भगवती

मा॰पु॰ कामधेनुर्ददौवरान् ६० पयश्चामृतकल्पंहियत्पीत्वामृतमश्नुते घृतंचसाद
दौधेनुर्यत्नाद्वृद्धिंप्राप्तायतः ६१ यज्ञैस्तत्तृप्ताःसुराःसर्वेसुरभिस्तंचाभवन्नतः प्र
३४ जाश्चवृद्धिमापन्नाःकामधेनुप्रसादतः ६२ पवित्रापरमासावैसर्वदेवमयीशुभा
अवतीर्णास्वयंदेवीगोभूत्वाभवभाविनी ६३ पूजितायेनगौर्विप्रापूजिताःसर्व
देवताः प्रदक्षिणीकृतायेनपरिक्रांतावसुंधरा ६४ मंगलंदर्शनेप्रातःपूज
नेपरमंपदं स्पर्शनेपरमंतीर्थंनास्तिधेनुसमंक्वचित् ६५ अज्ञानाज्ज्ञानतो
वापियेनदृष्टामुनीशगौः तस्यपापंक्षयंयातियथाग्नेस्तूलराशयः ६६ हस्ते
कृत्वातुगोपुच्छंपितृतर्पणमाचरे [illegible] त् निरयस्थाश्चपितरोब्रह्मलोकम
वाप्नुयुः ६७ गोच्छायायांमहाभागश्राद्धंकुर्वंतियेनराः गयाश्राद्धफलंतेषां रामः
कनिष्ठंस्यान्महामते ६८ गोमयेनानुलिप्तायांभूमौवाकुरुतेक्रियाः अनं ३४

तत्फलंद्राविप्रभवेयुर्नैवसंशयः ६९ सकृत्प्राश्नातिगोमूत्रंयोनरश्चमहामुने
दुर्भोज्यभोजनाच्चैवदुरुक्तात्दुर्नयोचरात् ७० मुच्यतेसर्वपापेभ्योगच्छेद्ब्रह्मप
प रंमतः ञ्चौविचकरंस्थानंस्तुहुगोमूत्रविन्दुना ७१ कण्डूयनंगवांयोवैकुरी
तियद्दिमानवः गोहत्याब्रह्महत्याभ्योमुच्यतेनात्रसंशयः ७२ गोग्रासंभोजनय
स्तुदद्याद्दोभ्योमहामुने ब्राह्मणाभोजितास्तेनसहस्रंवेदपाठिनः ७३ तीर्थेदि
वालयेवापियहणेचन्द्रसूर्ययोः व्यतीपातेचमन्वादौयुगादौसंक्रमेतथा ७४
दातातस्यागृहीतापितावुभौस्वर्गगामिनौ सस्तवर्णासवस्त्राचसर्वाभरणभूषिता
७५ पयस्विनीसवत्साचयेनदत्तामुनीश्वरः तेनतप्तंहुतंतेनजप्तंतेनकृतंतथा
७६ नानाद्रव्यान्वितातेनदत्ताविप्रवसुंधरा शृणुनारदयद्वृत्तमितिहासंसुय
एपदं ७७ उज्जयिन्यांपुरायासीद्वर्द्धमानोमहावणिक् वभूवधनधान्यैश्चपुत्र

मा॰पु॰ पौत्रैश्चसंवृतः येनकेनप्रकारेण कृतंद्रव्यार्ज्जनंतथा धनंचोधिस्ततोजातो मो॰१
रत्नानानिचयैस्तथा ७९ पुत्राश्चापिमहाभागाश्चत्वारोह्यभवंस्तदा कृत्वाद्रव्य
३५ विभागंसः कालधर्ममुपागतः ८० त्रयःपुत्रास्तुतस्यापिवणिग्धर्मरतामुने
अभवत्पश्चिमोयस्तुनाम्नावरधरोवरः ८१ द्यूतवेश्यादिव्यसनैःक्षयंनीतंमहद्ध
नंजीवनंकृतवान्वेश्यापरिचारेणवैततः ८२ अन्वेषतविरोधैवकिंचिदाप्य
धनंततः जीवतेजातिरहितोगम्यागमनसंयुतः ८३ चौरधर्मरतश्चैवकृतवा
न्मुनिपुंगवः गोधनंचौर्यतोहृत्वाविक्रीतेचसवैवणिक् ८४ म्लेच्छवेश्यास
मायुक्तोवनांतवसतिस्तथा वेश्यादूतैश्चचौर्य्यैश्चसमासक्तोऽजितेंद्रियः ८५ रामः
एकदामदिरांपीत्वाजगामनगरेवरे ददर्शकंचिद्दातारंगंगाम्बुभांडानमुद्यतं ३५
तंदृष्ट्वावणिजश्चित्रमाश्चर्य्यकलितंमुने विप्रान्देशान्यहितंस्वधोतान्नरपरिच्छदान् ८७

ऊर्द्धपुंड्रधरान्सौंतान्पश्यतिग्रहसमुद्यतान् आश्चर्य्यपरमोभूत्वाहस्तोगोपुच्छधारि
णः ८८ गृहमागत्यतरसागोंगृहीत्वामदालसः एकंदिनेसमानीयब्राह्मणांब्रह्मस
त्तमः ८९ सत्कर्महसितंतुचक्रेगोदानंमदिराश्रितः अन्योपिम्लेच्छजातीयोगृहसंस्त
मदालसः ९० ब्राह्मणस्तांगृहीत्वातुययोस्वभवनंत्वरं प्रबुद्धोमदिरात्यक्तोवेश्यो
पिस्वस्थमानसः ९१ किंकृतंकिंकृतंचेतदयज्ञोर्दत्ताद्विजातये अन्वेषयतिस्मसतं
नष्टापगृहमागतः ९२ आगतायमदूताश्चनेतुंतंवाणिजंखला देवदूताश्चतत्रापि
तस्मिन्नेवागतावने ९३ विवादश्चतथातेषांदूतानांयमदेवयोः ।मत्वाविकल्पयंवै
श्यंनित्युर्लोकंप्रजापतेः ९४ अमक्त्यापिकृतेविप्रगोदानंयत्पुराशुभं तस्मात्सर्वे
श्चपापेभ्योनिर्मुक्तोभवदंत्यजः ९५ नगोदानसमंविप्रपुण्यकर्ममहामते तस्मात्स
र्वेणयत्नेनगोदानंशुभमाचरेत् ९६ भूतवेतालकूष्मांडग्रहयक्षाःसमस्वरेत् यद्य

मा०पु० दिच्छति तत्सर्वं प्राप्नोत्येव न संशयः २७ यथा गोदानतः पुण्यं तथा चान्नप्रदानतः
दीनानाथशरीरेभ्यो यद्दानं सात्विकं मतं २८ अन्नदानान्महाभाग सर्वदानं कनिष्ठि
३६ कं तस्मात्सर्वप्रयत्नेन अन्नं दद्यात्सुधावृते २९ सर्वकाले सर्वदेशे सर्वपात्रे महामते
दद्याद्दन्नं परं भक्त्या सर्वं प्राप्तिपरायणः १०० इति स्कान्दे केदारखण्डे मायाक्षेत्र
माहात्म्ये गोदानमहिमा ॥ १० ॥ स्कन्द उवाच अन्नेन चैव दत्तेन किन्न दत्तं मही
तले सर्वेषामेव दानानामन्नदानं विशिष्यते १ अत्राप्युदाहरंतीममितिहासं पु
रातनं आसीदिलावृते वर्षे श्वेतो राजा महायशाः २ गंगाद्वारे महातेजास्तपः कर्त्तुं स
मायया वर्षाणां नियुतं तेपे तपः परमदारुणं ३ तस्यैव तप्यमानस्य चलाद्देवाः स
वासवाः वरेणाछंदयामास ब्रह्मा तं च तपोनिधिं ४ ब्रह्मोवाच वरं ब्रूहि महाभाग रामः
यत्ते मनसि वर्त्तते नाप्राप्यं ते महाभाग त्रिषु लोकेषु विद्यते ५ श्वेत उवाच ईयंस ३६

वीर्ययोंब्रह्मनमद्धीनासुरायजः यत्किंचिद्वस्तुजातंमेसर्वस्याद्ब्राह्मणार्थकं ६
इदंक्षेत्रंचैतेनाम्नाविख्यातंख्यातम्महीतले तत्रावासश्च विष्णोश्चशिवस्यापिभवत्व
रं ७ सर्वेषांचैवदेवानांस्थितिश्चापिप्रजापते: पृथिव्यांयानितीर्थानितान्यत्र
स्युःस्थिराणिभो ८ ब्रह्मोवाच इदंतीर्थंमहापुण्यंत्रैलोक्येचातिदुर्लभं
अतःपरंचमन्नाम्नाविख्यातंचभविष्यति ९ येवैस्नास्यंत्यत्रकुंडेगच्छेयुस्ते
परंपदं यत्कर्मक्रियतेचात्रतत्सर्वंस्यादनंतकं १० पृथिव्यांयानितीर्थानिता
निसंनिहितायवै भविष्यन्तिमहाराजसर्वभावैरतःपरं ११ इयंचपृथिवीस
वीसशैलवनकानना सप्तद्वीपसमुद्रान्तात्वद्धीनाभविष्यति १२ धर्मवुद्धि
महाराजदानवुद्धिश्चशाश्वती ब्रह्मणार्थंसमुत्पन्नोनारायणपरोभव स्कन्द
उवाच इत्युक्त्वासहसाविष्णुब्रह्मलोकंस्वकंययौसोपिराजामहाराजययौस्वेप्रवरेस्थले १४

मा०पु० जित्वाच पृथिवींसर्वांसप्तद्वीपांससागरां स्थापयामासस्ववंशेसर्वान्वैपृथिवीभु
३१ जः १५ चकारपृथिवीधान्ययज्ञान्हेमधादिकान्मुने स्वर्णरत्नमहार्हाणिवासां य०
सिविविधानिच १६ ददौसविप्रवर्येभ्योवेदविद्भ्योविशेषतः वशिष्ठंसर्वशा
स्त्रज्ञंसोवाचतपसांनिधिं १७ श्वेतउवाच भगवन्ज्ञातुमिच्छामिब्राह्मणोद्योव
सुंधरां देह्यनुज्ञांतपोराशेशिष्यायशुभकारणं १८ वशिष्ठउवाच अन्नदा
नंमहाराजसर्वकामसुखावहं अन्नेनचैवदत्तेनकिंन्नदत्तंमहीतले १९ अ
न्नाद्भवंतिभूतानिअन्नेप्राणाःप्रतिष्ठिताः तस्मात्सर्वप्रयत्नेनअन्नदानंददस्व
भो २० श्वेतउवाच किंवत्स्यन्नंविदित्वासमकोटदत्तावृन्नमंबुच रत्नवस्त्राद्यलं
कारानुष्ठीमंतिनगराणिच २१ दत्तवान्ब्राह्मणेभ्योथकुंजरान्वाजिनानिच रामः
स्वर्णरौप्यरत्नानियानानिविविधानिच २२ अश्वमेधसहस्रैश्चइयाजव ३१

हृदस्थिणे: स्वल्पंवस्तुपरंज्ञात्वासोन्नंतुनाददत्प्रभुः २३ एवंतस्यमहाभागदि
व्यंवर्षशतंययौ ततःकदाचिन्नृपतिःकालधर्मवशंगतः २४ परलोकेवर्त्तमानः
स्वर्वेश्याभिसंभिष्टुतः क्षुधयापीडितोत्यासीत्तृषयाचनराधिपः २५ क्षुत्तृष्णाभ्यां
पीड्यमानःस्वर्गभोगान्वितोपिसन् आनिनायाप्सरोभोगंगत्वाश्वेतंमहागिरिं २६
ददर्शतत्रनृपतिर्दग्धदेहंपुरात्मनः अस्थीनिचर्वयामासशीर्णानिमुनिपुंगव २७
चर्वयित्वापुराराजाविमानवरमास्थितः अप्सरोगणगंधर्वसेवितोदिवमाव्रजन्
२८ एवंसंत्यहराजासंगृह्यास्थीनिसल्लीलहन् तत्रास्तेश्वेतसंकाशंपुनःस्वर्गंजि
गामह २९ अथकालेनमहतावशिष्ठेनमहात्मना अस्थीनिचर्वयन्दृष्टोराको जा
श्वेतोमहातपाः ३० उवाचप्रहसन्वाक्यंकिमहोस्यास्थिचर्वणं एवमुक्तस्तदाराजा
ब्रह्मपुत्रेणधीमता ३१ जगादलज्जितोराजामुनिंचेदंतपोनिधिं क्षुधामांवाधते

मा०पु० ब्रह्मन्यदन्नंपुनरादद् ३२ पानिचापिमहाभागततोमांबाधतेतृषा एवमुक्त्वा
स्तदाराजाब्रह्मपुत्रोमहामुनिः ३३ पुनर्जगादतंश्वेतंमहाराजंमहार्थवित् फलंम
३८ तन्महीशानावधीरितवचोयतः ३४ अदत्तंनोपतिष्ठेतकस्यचित्किंचिदप्यहो त्व
यादत्तानिराजेन्द्रस्वर्णरत्नावराणिच ३५ तानिसर्वाणिभोगार्थंतवसन्तियतः
क्वचित् अन्नपानंचनोदत्तंस्तुटत्सेतवसंस्थितं ३६ लोकंमत्वात्वयाराजन्
न्नदत्तेचाइन्नंवाचके अदत्तंनोपतिष्ठेतसाक्षादपिप्रजापतेः ३७ श्वेतउवाच किं
कर्तव्यंमहाभागकथंनोबाधतेक्षुधा कृतांजलिरहंयातेअदत्तंकथमाभजेत ३८
वशिष्ठउवाच अस्त्येकंकारणंयेननजायतेनात्रसंशयः तच्छृणुष्वनरव्याघ्र क
श्वे०२ थ्यमानंमयाऽनघ यथापुराविनातासौमहीपालोमहायशाः कृतवानश्वमेधांश्च रामः
सहस्राणिमहामुनिः ४० दत्वास्तेनतथागावोरत्नस्वर्णवराणिच लोकंमत्वानेत ३८

नापिपानं चान्नं महीपते: ४१ सोपि गंगोत्तरे देहं तत्याज मुनिपालक: गतवांस्तु
ब्रह्मलोकादीन् नानाभोगसमन्वित: ४२ त्वमिव स्तुधया विष्ठोवभूवत्तृषयातथा पुन
र्मर्त्यं समायातो विमानेनार्कवर्च्चसा ४३ गंगाद्वारे महाक्षेत्रे नीलाभिधमहीधरे
दग्धं कलेवरं सोपि दृष्ट्वा भोक्तुं मनो दधौ ४४ तावद्ददर्श होतारं विनीताश्वापुरोहितं
उक्तश्च कारणं विप्रेस्तुधी याश्च तपोनिधे ४५ कथयामास तं होता व्रतीकारं क्षुधस्तृष:
प्रथमा तिलधेनुश्च जलधेनुस्ततःपरं ४६ रसधेनुस्तृतीयापि गुडधेनुस्तथा स्मृता:
शर्क्करामधुधेनुश्च क्षीरधेनुश्च सप्तमी ४७ अष्टमी दधिधेनुश्च नवनीतमयी तत:
तथा लवणधेनुश्च सत्कार्प्पासमयी तथा ४८ धान्यधेनुस्तथा प्रोक्ता द्वादशैता: प्रकी
र्त्तिता: घटं संस्थाप्य राजानं कारयामास तास्तथा ४९ ययो परमिकां सिद्धिं सर्वतृ
प्तिमयीं प्रभो तथा त्वमपि राजेन्द्र कुरुष्वैता महार्थदा ५० तृप्तिं प्राप्स्यसि भूयिष्ठां सुधा

मा०पु० नोपीडयिष्यति अन्नदानात्परं नास्ति त्रैलोक्ये प्रीतिवर्द्धनं ५१ स्कन्द उवाच वशि
ष्ठोपि महाराज कारयामास राजतः अन्नच्छत्रिकं चैव धेनूनां विस्तरं तथा ५२ अन्न
३९ दानात्परां तुष्टिं प्राप्य तेन नराधिप विमानवरमारुह्याप्सरोगणसमन्वितः ५३ सि
द्धैः संस्तूयमानो वै जगाम परमं पदं तस्मात्सर्वप्रयत्नेन अन्नदानपरो भवेत् ५४
मुष्टिमात्रमपि सेवे गंगाद्वारे विशेषतः अन्नं ददाति विप्राय तृप्तः स्यात्कल्पपंचकं
५५ अन्नदो राज्यमाप्नोति अन्नदो गतिमुत्तमां तस्मात्सर्वप्रयत्नेन शक्त्या चान्नप्रदो
भवेत् ५६ इति स्कान्दे मायापुरीक्षेत्रमाहात्म्ये अन्नदानमाहात्म्यं ॥ ११ ॥ का
र्त्तिकेय उवाच कुशावर्त्तं महातीर्थं दक्षिणे ब्रह्मतीर्थतः तत्र स्नात्वा महाभाग
न च भूयोभिजायते १ स्नानं दानं जपो होमः स्वाध्यायः पितृतर्पणं यदत्र क्रियते रामः
कर्म तत्तत्स्यात्कोटिसङ्ख्यकं २ पुरा गंगागमे मौनी दत्तात्रेयो महातपाः तस्या ३९

वेकेनपादेन वर्षाणामयुतंमुनिः ३ कुशाचीरातिरंहंचकुंडीचोवाहजाह्नवी
आवर्त्तयित्वापुनरसौकुशान्प्लुतवतीमुने ४ आप्लुतांतेकदाचित्तुददर्शकुश
चीरका वहमानांमहाभाग गंगामावर्त्ततांगतां ५ कुद्धोमहामुनिस्तांतुयावद्भस्मी
करोतिच तावत्सर्वेसमायाताब्रह्माद्यास्त्रिदिवौकसः ६ तुष्टुवुःपरमंभक्त्याकीर्त्ति
वीर्य्यगुरुंमुनिं संस्तुतश्चप्रसन्नोभूद्ब्रह्मादीनाहवाचह ७ अत्रैवभवतांस्थानं
नित्यंस्यात्तीर्थकेवरे आवर्त्तनाद्यतोगंगाकुशान्प्लुतवतीमम ८ कुशावर्त्तमिति
ख्यातंतीर्थमेतद्भविष्यति धन्यालोकाःकरिष्यन्तिस्नानंपितृसमर्च्चनं ९ तत्पितॄ
णांतदास्यात्पितस्याजन्मपुनःक्वचित् कुशावर्त्तेमहातीर्थेदत्तंस्यात्कोटिसङ्ख्यकं १०
इतितेकथितावृष्टिःकुशावर्त्तस्यपुण्यदा श्रुत्वायेतांमहोत्पत्तिंसर्वपापैःप्रमु
च्यते ११ इतिस्कान्देमायासेचमाहात्म्येकुशावर्त्तकथनंद्वादशः। १२

मा॰पु॰ स्कन्दउवाच ततोदक्षिणदिग्भागेविष्णुतीर्थंधनुःशते यत्रस्नात्वापरंब्रह्मलीनोभ
४० वतिनिश्चितं १ तस्यचिह्नंप्रवक्ष्यामियेनतज्ज्ञायतेशुभं कृष्णसर्पोमहानेकोदृश्य
तेफणामंडितः २ मार्जकश्चचतुर्दंष्ट्रोजलमध्येप्रयातिच तत्रस्नातिपुनःस्वर्गेनिधि
र्ह्योभवतिस्मरणात् ३ केनचित्कारणेनासौराजापरमधार्मिकः शप्तोदुर्वाससाविप्र
पुराकृतयुगेचरे ४ नारदउवाच केनवैकारणेनायंशप्तोराजामहायशाः किंना
मायंकार्त्तिकेयकुत्रत्यस्यनराधिप ५ शापस्यांतंकदातस्यभविष्यतिमहामते त्वने
नकिंकृतंराज्ञातस्यदुर्वाससोमुने ६ स्कन्दउवाच शृणुनारदवृत्तांतंराज्ञस्यापि
तपोनिधे पुराकृतयुगेराजासूर्यवंशविवर्द्धनः ७ नाम्नाधर्मध्वजइतिख्यातोरिपु
विनाशनः कृत्वाबहुविधान्यज्ञान्समाप्तवरदक्षिणान् ८ वनितासहितस्तंतु राम:
गंगाद्वारेसमाययौ अत्रागत्यमहातेजान्यवसद्धिस्तुलत्परः ९ एकदाधर्मकेतुस्तु ४०

स्नात्वागत्यगृहेस्वके ददर्शमुनिमासीनंपीठेदुर्वाससंवरं १० दृष्ट्वातंसहसाराजापा
दयोःप्रपपातह पाद्यमाचमनीयंचस्वासनंचार्घ्यसंयुतं ११ ददौतस्मैमहाभा
गविधिदृष्टेनकर्मणा उवाचवचनंचेदंस्वागतंतेमहामुने १२ धन्योस्म्यनुगृही
तोस्मीयस्त्वंमेगृहमागतः किमागमनकृत्यन्तेकार्यंकिंकरवाणितत् १३ दुर्वा
सउवाच संप्राप्तोभोक्तुकामोहंपारणाहिदिनत्विदं शीघ्रंभोजयमांराजन्क्षु
धितोस्मिपरंविभो १४ स्कन्दउवाच इतिश्रुत्वाभिगदितंमुनेर्दुर्वाससोनृपः तु
ष्टेत्युक्त्वाययावंतर्गृहेकर्त्तुंमहामुने १५ संपादयतिभोज्यंचयावद्राजामहामतिः
शूकरास्यसमायातोभ्रातुर्वैरमनुस्मरन् १६ विघ्नंवैकर्त्तुमारब्धोदृष्ट्वादुर्वाससंमुनिं
सर्पोभूत्वास्वयंरक्षणकांतेभोज्यपात्रके १७ उत्ससर्जमहाक्ष्वेडंतद्दृष्टोभक्तितोर्जिते
नज्ञातंतन्महीभर्त्राकृतंयद्रक्षसामुने १८ प्रवेशयामासमुनिंभोक्तुंभोज्यंततःपरं

यावद्द्वयेसमायातिज्ञातंतावद्विषोल्वणं १९ विषसंवलितंदृष्ट्वाभोजनंसुतपात्र
के क्रुद्धोमुनिःशशापैनंधर्मकेतुंनराधिपं २० यस्मात्त्वयाविषोत्सृष्टंभोज्यंमेदीयते
धर्म तस्मात्त्वंभविताद्रुसकालसर्पःशतंसमः २१ उत्सृष्टंतुतदादृष्ट्वाशापाग्निंमुनिनेरि
तं वेपमानोमहीभर्त्ताभयार्त्तोनिजगादितं २२ ब्रह्मन्नहंकथंशप्तोविचार्यैदंममप्र
भो इतिप्रोक्तोमुनिस्तेननरद्धोरःसोविचेष्टितं २३ ज्ञात्वालज्जासमायुक्तोदुर्वासा
मुनिपुंगवः उवाचतंमहाराजंवेपमानंकृतांजलिं २४ कृतमेतन्महाराजशत्रुणा
तववरक्षसा चसात्रेवचनृपतेविष्णुतीर्थेसुपुण्यदे २५ अहमत्रागमिष्यामिक्षुंगते
नरपुंगव मांदृष्ट्वासहसागतातद्विष्णोःपरमंपदं २६ दुःखंनोत्रप्रकर्त्तव्यंशापांतोभ
वितातव प्रियायासहितोविष्णोःसायुज्यंप्राप्स्यतेचिरात २७ इयंचापिमहाभाग
सर्पिणीभविताखलु गोपनार्थंसज्जातेश्वमासोचखमहीपते २८ गंगाद्वारंपरंस्से

त्र्यंयत्रब्रह्मादयःसुराः निवसन्तिविमुक्त्यर्थ्यंयेनकेनापियेनिना २९ खेदस्त्वयान
कर्त्तव्योभुंजस्कूमशरीरतः ज्ञानंचभवितातत्रमोक्षमार्गप्रदर्शकं ३० इत्युक्त्वाप्
ययौविप्रोबदरीविपिनेततः सोपिराजामहाबाहुःसर्पदेहोभवन्मुने ३१ सपत्नीको
महाभागाहरिद्वारेसुपालये ३२ इतिस्कान्देहरिद्वारमाहात्म्येधर्मध्वजोपाख्या
ने०॥१३॥नारदउवाच शूकरास्योमहाभागकोवासराक्षसाधम अस्यभातापि
कोवास्तिकिमर्थंनृपराक्षसो १ अभूद्वैरंकदावैरंसर्वंमेविस्तराद्वद कुचेलयोस्त
संस्थानंकिंकृतंरक्षसापुरा २ स्कन्दउवाच आसीद्दनुकुलेविप्रतटोनामाऽसुराधि
पः सकेदाहिमवत्पार्श्वेदक्षिणेमुनिसेविते ३ पिंडारकनदीतीरेतपःपरमदारुणं
तेपेतरांनिराहारोवर्षाणामयुतंकिल ४ तस्यवैतपसातत्रज्ञास्त्रयोलोकाःसवासवाः
अथाशरीरिणीवाणीमाकाशेह्यशृणोत्ततः ५ साधुसाधुतटमधुइड्डंषंतपउत्तमं कि

मा०पु० सत्यंतेहितपसात्रैलोक्येनास्तिदुर्लभं ६ इतिश्रुत्वातदोवाणीजगादवचनंत्वि
दं यदिवैमेतपस्तप्तंततःस्यांविष्णुभक्तियुक् ७ विष्णुभक्तिविहीनानांमुक्तिःस्व
४२ प्नेपिदुर्लभा नोकांक्षेपित्रुलोकानांराज्यंनिहतकंटकं ८ श्रुत्वातद्वचनंतत्त्र
पुनःप्राचेशरीरिणी धन्योसिदानवश्रेष्ठयस्यतेमतिरीदृशी ९ तपसातवसंतुष्टो
विष्णोस्त्वंस्थानमेष्यति पुत्रौद्वौभवितारौतेतयोरेकस्तुवंशधृक् १० तपसाहतपा
पस्त्वंविष्णोश्चैवप्रसादतः अन्तेचपरमंस्थानंयास्यसियोगिदुर्लभं ११ इतितद्व
चनंश्रुत्वातदोनामतपोनिधिः तत्रैववनिवसन्सोपिविष्णुपूजनतत्परः १२ कालस्त्व
जस्तुतांप्रापविवाहविधिनाततः द्वौपुत्रौसमयेप्रापश्रूकरास्यगजाननौ १३ राक्ष राम
सीवुद्धिमापन्नौपीडयामासतुर्मुनीन् खादयामासतुःकांश्चित्कांश्चिज्जयाहलोमस्तु ४२
पाटयामासतुःकांश्चिच्चक्रतूरुधिराशनं एवंपीडयतोर्विप्रमुनीन्राक्षसयोस्तयोः १५

मुनयस्त्वासमापन्ना राजानं शरणं ययुः धर्मध्वजं महाराजं त्राहि त्राहीति वादिनः १६ कृता
ञ्जलयः सर्वे शूकरस्य भयार्दिताः त्राहि नो रक्षसो वीरं तव यं शरणं गताः १७ इति ते
षां वचः श्रुत्वा धर्मात्मा सत्यसंगरः माभैष्ट इति प्रोवाच सम्पूज्य च यथार्हतः १८ गृहीत्वा
स शरं चापं नगराद्बहिरायया लोकैः परिवृतः युक्तो हेलया जेतुमाव्रजेत् १९ यत्रास्ते
ते महाभाग राक्षसा कामरूपिणो आह्वयामास तौ वीरो धर्मकेतुः समं रिपून् २० कलाको
लाहलं तस्य राक्षसो ययतुः क्षणात् रक्तेक्षणो रक्तकेशो रक्तमाल्यानुलेपनो २१ बृहद्द
ह न्तो बृहत्कायो घोरो भीरुभयानको दृष्ट्वा तौ युयुधे राजा धर्मात्मा सत्यसंगरः २२ नाराचै
रसिभिश्चैव बाणैराभिर्मुशलैस्तथा वृक्षैर्महीधरशृङ्गैः स्वपणीयाश्मसंग्रहैः २३ युध्य
तां तु मुल्तः शूद्रः शूकरश्च गिरिकंदरे अश्मनां चर्मणां चैव वस्त्रूलानां मुशिनां तथा २४ ए
तस्मिन्नन्तरे राजा गजास्य वाणजालकैः छादयामास सहसा व्याकुलोभूच्च राक्षसः २५

मा०पु० ततोऽद्रिचन्द्रनागोत्र शिरश्छिन्नं द्विरदस्य सः पपात सह सा भूमौ वज्राहत इवाचलः २६
अलकनन्दोत्तरे तीरे श्वेतश्री संज्ञके शुभे तस्मात् स्थिमयो विप्र पर्वतो दृश्यते महा
४३ न् २७ गजाचल इति ख्यातस्तत्रास्ते ब्रह्मपुत्रकः शूकरास्योपि तद् दृष्ट्वा कर्मरातो म
होज्ज्वलं २८ ययौ कैलासनिलयं महाहर्म्यभयान्वितः गजास्योदिवमापन्नो देव
वैमानिकैर्युतं २९ ययौ परमिकां सिद्धिं मरणाद्धि हिमालये अज्ञानादपि यद्
क्षोनेकब्रह्मवधादिकं ३० संप्राप्य परमं स्थानं यत्सुरैरपि दुर्लभं इति ते कथि
तं सर्वं यत्पृष्टोहं त्वया द्विज ३१ श्लाघ्य धर्मध्वजस्येदं मुपाख्यानं स पुण्यदं मुच्य
ते सर्वपापेभ्य सत्यमेतन्न संशयः ३२ इति स्कान्दे हरिहरमाहात्म्ये धर्मध्वजो
पाख्यानं नाम चतुर्दशोध्यायः ॥१४॥ स्कन्द उवाच अन्यानि तीर्थवर्याणि सर्व
पापहराणि वै कथयामि शृणु प्राज्ञ गंगायां नारदाधुना १ गंगायाः पश्चिमे कूले तु

शावर्त्तोद्भवःशरे सप्तसामुद्रिकंनामतीर्थंपरमपावनं २ यत्रस्नात्वामहाभागाशि
वलोकेमहीयते पुरातत्रसमुद्रेश्वराधितोभगवान्शिवः ३ समुद्रेश्वरोमहादेवःस
र्वकामफलप्रदः ततोवैदक्षिणेभागेस्वर्णावर्त्तीश्वरःशिवः ४ सकृद्दृष्ट्वातुतंदेवंस
र्वपापैःप्रमुच्यते ततोर्द्धखंडक्रोशेवैशिवतीर्थमितिश्रुतं ५ तत्रस्नात्वामहाभाग
कैलासनिलयेवसेत् तत्रविल्वेश्वरोनाममहादेवोपिमुक्तिदः ६ यस्तत्रनियताहा
रःसप्तरात्रंजितेंद्रियः जपतेशिवमंत्रंचरुद्रचागमतत्परः ७ परांसिद्धिमवाप्नोतियास्तु
रैरपिदुर्लभां विल्वपत्रैसमभ्यर्च्यनम्रूयस्तनपोभवेत् ८ ततःशरद्वयेतीरेगंगा
याःशुभदायकं तीर्थंगणेश्वरंनामसर्वपापप्रणाशनं ९ तत्रस्नात्वामहाभागसर्व
पापैःप्रमुच्यते यस्तत्रकुरुतेपिंडंदानंपितृनिमित्तिकं १० दशवारंकृतंतेनगया
श्राद्धंनसंशयः ततःपश्चिमदिग्भागेशिलापरमपाविनी ११ नाम्नानारायणीख्याता

शावर्त्तोद्भवः शरे सप्तसामुद्रिकंनामतीर्थंपरमपावनं २ यत्रस्नात्वामहाभागशि
वलोकेमहीयते पुरातत्रसमुद्रेश्चसाधितोभगवान्शिवः ३ समुद्रेश्वरोमहादेवःस
र्वकामफलप्रदः ततोवेदशिरोभागेस्वर्णवल्लीश्वरःशिवः ४ सकृद्दृष्ट्वातुतंदेवंस
र्वपापैःप्रमुच्यते ततोर्द्धखंडक्रोशेवैशिवतीर्थमितिश्रुतं ५ तत्रस्नात्वामहाभाग
कैलासनिलयेवसेत् तत्रविल्वेश्वरोनाममहादेवोपिमुक्तिदः ६ यस्तत्रनियताहा
रःसप्तरात्रंजितेंद्रियः जपतेशिवमंत्रंचरुद्रचागमतत्परः ७ परांसिद्धिमवाप्नोतियासु
रैरपिदुर्ल्लभा विल्वपत्रैःसमभ्यर्च्यनभूयस्तनयोभवेत् ८ ततःशरद्वयेतीरेगंगा
याःशुभदायकं तीर्थंगणेश्वरंनामसर्वपापप्रणाशनं ९ तत्रस्नात्वामहाभागसर्व
पापैःप्रमुच्यते यस्तत्रकुरुतेपिंडदानंपितृनिमित्तिकं १० दशवारंकृतंतेनगया
श्राद्धंनसंशयः ततःपश्चिमदिग्भागेशिलापरमपावनी ११ नाम्नानारायणीख्याता

सर्वपापैःप्रमु[illegible]णाशिनी यस्तत्रकुरुतेश्राद्धंश्रद्धाभक्तिसमन्वितः १२ पितृवं
श्याः शतंमातृवंश्याश्चापितथास्वयं तारिताःपितरस्तेनसत्यंसत्यंनसंशयः १३
गंगायाःपूर्वदिग्भागेपार्वतीश्वरसंज्ञितः पार्वत्यायत्रनितरांपूजितोभगवाञ्छिवः १४
यस्यदर्शनमात्रेणसर्वपापंप्रणश्यति गंगातोदंडदशकेशिवःपरमपावनः १५ यद्द
र्शनात्पूजनाच्चसर्वान्कामानवाप्नुयात् नीलपर्वतप्राग्भागेधारासारवतीस्थिता १६
तस्यांस्नात्वातथाचम्यब्रह्मलोकमवाप्नुयात् तत्रैषासंगताविप्रगंगायांपापनाशिनी
पार्वतीतीर्थमाख्यातंसर्वपापप्रणाशनं तस्यचिह्नंप्रवक्ष्यामियेनतज्ज्ञायतेशुभं १८
मृत्तत्रकुंकुमारक्तातथारक्तशिलार्थदा यस्तांभालेनरःकुर्याद्गौरीलोकेमहीयते १९
तयामृत्तिकयायस्तुपूजयेद्विश्वनायकं सर्वसिद्धिमवाप्नोतियातिब्रह्मसनातनं २०
यस्तयापूजयेल्लिंगसहस्रंवेदमंत्रकैः प्राप्नोतिसकलांसिद्धिंमहादेवप्रसादतः २१

तस्मात्कोशाह्वकेतीर्थेगंगायाःभैरवाश्रितं पुरायत्रमहादेवोभैरवेनसमर्च्चितः २२
आपदुद्धारणोनामसर्वापत्तिविनाशनः तंपूज्यविधिवद्भक्त्यापूजितोनीललोहि
तः २३ तत्रायातिनदीश्रेष्ठानाम्नाभानुमवाशिनी तत्संगमेनरःस्नात्वासूर्यलोकेम
हीयते २४ गंगायाश्चसिरोणीरेमानेकोशात्मकेमुने तत्रैकाजलमध्येतुपीतवर्णा
शिलास्तिहि २५ नाम्नाजलेश्वरीप्रोक्तासर्वपापप्रणाशिनी गंगाद्वारोत्तरेभागेगं
गायाःपश्चिभागके २६ नदीकोमुद्वतीख्यातासर्वदारिद्र्यनाशिनी धनार्थयेमहा
भागस्नानंकुर्वंतिभक्तितः २७ लभंतेसप्तरात्रेणधनंदारिद्र्यनाशनं ततोवैपश्चि
मेतीरेधाराणपरमपावनी २८ गंगायांसंगमेयत्ररेणुकानाममनामत तत्रस्नात्वाच
जप्त्वाचफलानंत्यंलभेन्नरः २९ ततःकोशाह्वखण्डेवैनदीवज्रशिलाकिल तस्यां
स्नात्वानरोभक्त्याप्राप्नोतिरविमंडलं ३० यस्तत्रकुरुतेश्राद्धंभक्त्यायुक्तोमहामुने
पितरस्तस्यगच्छंतिस्थानसप्तोत्तरंशुभं ३१ ततःसोमेश्वरीगयपूर्तोनदीशंकरवल्लभा

मा०पु० यदम्बुस्पर्शमात्रेण ब्रह्महत्यादिकोटय नश्यंति किंपुनर्विप्रस्नानात्पानाद्धि
४५ वार्च्चनात् यत्रब्रह्मादयोदेवाःपुराशिवमतोषयन् ३३ नाम्नाचक्रनदीरम्यांपुण्या
शंकरवल्लभा गंगायांसंगमेयत्रतीर्थंपरमपावनं ३४ शङ्करंमुक्तिदंनॄणांब्रह्म
हत्यानिवारकं शङ्करेशोमहादेवोखिलसिद्धिमनोहरः ३५ यस्यदर्शनमात्रेणश
तजन्मार्जितैःपरैः मुच्यतेसर्वपापैस्तुकल्पंशिवपुरेवसेत् ३६ महापुण्यतमं
पीठंसद्यःप्रत्ययकारकं यद्दत्तंकुरुतेकर्मकोटिकोटिगुणंभवेत् ३७ वीरभद्रेश्व
रोदेवात्पश्चिमेयोजनार्द्धके शालिहोत्रेश्वरोदेंमहादेवोवरप्रदः ३८ शालिहोत्रो व
मुनिर्यत्रशिवसन्यस्तमानसः बभूवनियताहारस्तथावर्षसहस्रकं ३९ लेभे
विद्यांमहादेवाद्दृष्टादशमहामुने शालिहोत्रेश्वरंदेवंपूजयित्वाविधानतः ४० रामः
मूढोपिमंडलाद्यातिसर्वविद्यामहामुने तस्मात्पूर्वेक्रोशपादेनदीरंभाभिधामताः ४१ ४५

यत्रंभानिवसितुंमायापुर्य्यांसरिद्वरः एकदास्वर्गभवनेनत्वंति -- वालये ५२
ददर्शविलसद्भूतैस्तुनीयमानान्मृतान्शुभे मायासेत्रेकृतावासान्वैकुंठंप्रतिगच्छ
तः ४३ उपास्यमानान्देवौघैरिन्द्राद्यैगणकिन्नरैः चतुर्भुजान्शंखचक्रगदापा
णीन्हरीनिव ४४ पीताम्बरान्सलक्ष्मीकांस्तथाश्रीवत्सलांछनान् विभूतिभिः
शोभमानानारूढस्यान्स्ववर्च्चसः ४५ इतितान्मुक्तिमापन्नान्दृष्ट्वाश्चर्य्यमवाप
सा प्रोवाचशक्रंदेवेशंतदातिथ्यार्थमुत्थितं ४६ त्रैलोक्यनाथभगवन्कएते
सूर्य्यवर्च्चसः हरयोवानन्तरूपधरावुधगणेश्वरः ४७ कुतःसमागताह्येतेघ
प्रयांतिचसेविताः ~~इत्युवाच~~ प्रियेह्येतेमहात्मानोमायासेत्रांतवासिनः ४८
मृतागच्छंतिपरमातद्विलोःपरमंपदम् मायासेत्रसमंपुण्यंपृथिव्यांनैवविद्यते ४९
तिस्रःकोट्योऽर्द्धकोटीचतीर्थानांवायुरब्रवीत् तानिसर्वाणितन्वंगीमायासेत्रेनसंशयः ५०

मा॰पु॰ वयंसर्वेपितत्रैववसामोमुक्तिलालसाः रंभोरुवाच अहमत्रवसेयंवैयथा
ज्ञापयवासवः ५१ भविष्यामियथाद्यंतेरूपांकुरुममोपरि इन्द्रउवाच सरि
५६ द्धूतावरारोहेनित्यंतिष्ठवरानने ५२ (हत्वालो)हित्वराङ्घर्षीरचयित्वाचमेदिनीं मे
हेसाउष्ट्रयोश्चैवब्रह्मावचननोदितः ५३ जगामशतशोविप्रक्षेत्राणिधरणीतले
इष्टुंभक्त्यान्वकीर्णोश्चगंगाद्वारमुपागमत् ५४ यत्ररैभ्योमहातेजाउग्रेतपसिसं
स्थितः दशवर्षसहस्राणितस्थावुद्धकरोमुनिः ५५ ततोवर्षसहस्रेवैवायुभक्षोम
हातपाः शैवालचर्वणंपंचशतंवर्षाणिनारद ५६ इतिवैतपमानस्यरैभ्यस्यमुनि
पुंगवः आम्ररूपंसमास्थायकुब्जरूपस्यमाधवः ५७ दर्शयामासभगवान्दर्शनं रामः
मुक्तिकारणं सोपिरैभ्योमहाभागस्तंदृष्ट्वाजगतांपतिं ५८ जानुभ्यामवनिंगत्वाप्र ५६
नःपुनरुदारधीः प्रोवाचमधुरंवाक्यंप्रमाणार्थिमहाशयः ५९ पुण्येन

वजलेयेपिस्नातारःपरगामिनः स्कन्द उवाच इतिश्रुत्वावचोभर्तुःप्रणिपत्यवराम्बि
ताः ५३ आययौपरमेपुण्येमायाक्षेत्रेसरिद्वरा जातापुण्यतमाविप्रसर्वपापप्र
णाशिनी ५४ रंभाकुंडंचगंगायाःसंगमेपुण्यदायके उपस्पृशंतिपानीयंरंभया
सहमोदते ५५ रंभेश्वरोमहादेवस्तत्रैवशिवदायकः ततःपरंमहाभागकुब्जाम्रक
मितिस्मृतं ५६ तत्राम्रेकुब्जरूपेणदृष्टोमुनिभिरच्युतः ततःकुब्जाम्रकंतीर्थंस
र्वपापप्रणाशनं ५७ सकृद्दृष्ट्वातुयत्क्षेत्रंपरब्रह्मणिलीयते इतितेकथितंविप्र
गंगाद्वारस्यवैभवं ५८ यच्छ्रुत्वासर्वपापेभ्योमुच्यतेनात्रसंशयः श्राद्धेशृणोति
योमर्त्योगंगाद्वारस्यवैभवं ५९ पितरस्तस्यगच्छंतितद्विष्णोःपरमंपदं यःपठेन्मा
नवोभक्त्याशृणुयाद्वापिभक्तितः सयातिपरमंस्थानंयत्रदेवोमहेश्वरः ६१ इति
स्कन्दपुराणेमायाक्षेत्रेहरिद्वारमाहात्म्येसमाप्तःपंचदशोध्यायः ॥ १५ ॥

मा०पु० नारद उवाच कुब्जाम्रकं महातीर्थं वद विस्तरतो मम श्रुत्वेदं च समुत्पन्नं यथा
४७ पुण्यं हि चाभवत् १ केन केन तपस्तप्तं के वा प्राप्ताः परमां गतिं कानि तीर्थानि चैवा
त्र कियन्मानं सुपुण्यदं २ एतत्सर्वं महासेन विस्तराद्वद मे प्रभो त्वत्समो ना
स्ति त्रैलोक्ये भक्तवत्सलतां गतः ३ स्कन्द उवाच शृणु नारद यत्नेन गुह्यं क्षेत्रं
परं हरेः यस्य स्मरणमात्रेण शतजन्मसमुद्भवैः ४ मुच्यते सर्वपापैश्च विष्णुलोकं
च गच्छति सान्निध्यं यत्र विष्णोर्हि नित्यं तिष्ठति नारद ५ पुरा सप्तदशे प्राप्ते युगे
योगीन्द्र माधवः मायां स्वीयां प्रविष्टोपि दृष्ट्वा चैकार्णवां महीं ६ मधुकैटभौ दुरा
त्मानौ निजकर्णसमुद्भवौ बाधयन्तौ च ब्रह्माणं त्रैलोक्यं संप्रमुद्यतौ ७ हत्वा तौ
हि दुराधर्षौ रचयित्वा च मेदिनीं मेदसा तुष्टो ब्रह्मणश्च वचनेनोदितः ८ जगा राम:
म शतशो विप्र स्वेच्छयासौ धरणीतले द्रष्टुं भक्तान्स्वकीयांश्च गंगाद्वारमुपागमत् ९ ४७

यत्ररैभ्योमहातेजाऊर्ध्वेतपसिसंस्थितः दशवर्षसहस्राणितस्थौबुद्धकरोमुनिः
१० ततोवर्षसहस्रंवैवायुभक्षोमहातपाः शैवालचर्वणंपंचशतंवैर्षाणिनारद
११ इतिवैतपमानस्यरैभ्यस्यमुनिपुंगव आत्मरूपंसमासाद्यकुब्जरूपस्यमाधवः
१२ दर्शयामासभगवान्दर्शनंमुक्तिकारणं सोपिरैभ्योमहाभागस्तंदृष्ट्वाजगतांपं
तिं १३ जानुभ्यामवनिंगत्वापुनःपुनरुदारधीः प्रोवाचमधुरंवाक्यंप्रसादार्थीमहा
शयः १४ रैभ्यउवाच नमःकमलनाभायविश्ववेद्यभवविश्वे सुनन्दायसुभद्रा
यदुराड्दर्षायतेनमः १५ हिरण्यबाहवेतुभ्यंहिरण्याक्षविमर्दिने नमोहिरण्य
५३ नाभायहिरण्यचररूपिणे १६ हरिताश्वायहरयेहरिलिंगायहारिणे हरियो
वाहयायपरायहयवाहवे १७ अहंकारविमुक्तायहेमसंस्थायहारिणे नमोहि
रण्यनेत्रायनमस्तेहरियाहवे १८ नमोहिरण्यगर्भायहृषीकेशायतेनमः हविषे

मा॰पु॰ हविराशायवर्हिर्पत्राय वर्हिषे १९ हेमांगदाय गुडाय हिमाद्रि प्रकृतोकसे हि
माद्रितनयाधीशस्तुहृदयस्थाय हुं कृते २० हेयाहेयविहीनाय सर्वाहिपतये न
४८ मः हृषीकेशाग्रमस्थाय हीरकासायते नमः २१ हस्तिमस्तकसंस्थाय वेह्वहस्ताय
ते नमः सहस्रहस्तरूपाय सहस्रकरमर्द्दिने २२ सहस्ररश्मिरूपाय फणासा
हस्ररूपिणे सहस्राकृतकार्याय सहस्राभक्तिभाविने २३ स्कन्द उवाच इति स्तु
तो महाविष्णुस्तेन रैभ्येण धीमता उवाच मधुरं वाक्यं विनयावनतं स्थितं २४
श्रीभगवानुवाच वरं वरय भद्रं ते तव यद्धृदि वर्त्तते किं च चेकां ऽस्तेगावः किं
वा राज्यमकंटकं २५ अथ चेच्छसि वा स्वर्गं यत्र ते चाप्सरोगणाः अथ चेच्छसि विप्रे
न्द्र ऋषीणां चोत्तमो मुनिः २६ अथ चेच्छसि कन्यानां सहस्रं दिव्यमुत्तमं वररत्न
समृद्धानां हेमभाण्डविभूषितं २७ सर्वासां दिव्यरूपाणां भवंत्यप्सरसां गणाः हा

राम॰
४८

मित्येवरं चैव रैभ्य यत्ते विचिंत्यतं २८ रैभ्य उवाच धन्योस्मि कृतकृत्योस्मि य
स्य त्वं दृष्टिगोचरः न चाहं कांचनं गावो नान्यद्विषयो राज्यमेव च २९ नो कांक्षे जगतां ना
थ त्वद्रूपं सार्थ्यहं विभो यदि प्रसन्नो भगवन् लोकनाथ जनार्द्दनः ३० तव चात्र
निवासं वै नित्यमिच्छामि माधवः यावल्लोका धरिष्यंति तावत्त्वं मम प्रभो ३१
स्थानं तव मम स्थानं नराणाममृतं भुजि भक्तिश्च स्यादुमानाथ तव पादांबुजद्वये
३२ स्कन्द उवाच रैभ्यस्यैवं वचः श्रुत्वा भगवान्भूतभावनः बाढमित्येव विप्रेंद्र
सर्वमेतद्भविष्यति ३३ यस्मादाम्रं समाश्रित्य कुब्जरूपेण वै त्वया दृष्टोस्मि रैभ्य
तस्मादेतत्कुब्जाम्रकमिति स्फुटं ३४ तीर्थमेतन्महापुण्यं भविष्यत्यभिधानतः अ
स्मिन्क्षेत्रेपि यो मर्त्यः स्नानं दानं जपादिकं ३५ भविष्यति महाभाग तत्सर्वं कोटिस
हस्रकं करिष्यति निवासं च तीर्थेस्मिन्प्रवरे नराः ३६ प्राप्स्यंति प्रवरं स्थानं पुनरा

मा०पु० दृत्तिदुर्लभं पापिनश्चापि विप्रेन्द्र मृताविष्णुमवाप्नुयुः ३७ पितरस्तस्य हृष्य
न्तियस्यास्मिन्संक्षेत्रके स्थितिः येपि विष्णुपमाणांवै दद्युर्जलमनुत्तमं ३८ पितृ
४९ न्यस्तारितास्तेन संसारात्पितरोमुने परमाणुप्रमाणांच यत्र दद्युर्हिरण्यकं ३९
दत्तंतेनभवेद्धि प्रसहस्रंपरिसंख्यया येचदद्युर्महाभागवासोगोभूषणादि च ४०
तेनदत्तंभवेदेव सर्व्ववस्तुमहामुने कुब्जाम्रकेमहातीर्थेवसामिरमयासदा ४१
हृषीकाशिपुराजित्वा दर्शःसंप्रार्थितस्त्वया यद्वाहंतुहृषीकेशोभवाम्यत्रसमा
श्रितः ४२ ततोस्यापरकंनामहृषीकेशाश्रितंस्थले त्रेतायुगेदाशरथिर्नाम्ना
भरतसंज्ञितः ४३ तुर्य्योभागोमदीयोवैभविष्यतिसहायजः शंकरःशंकरः रामः
साक्षात्पुनर्मांस्थापयिष्यति ४४ कलौभरतनामानंवदिष्यतिमहीतले कृते ४९
वाराहरूपेणात्रेतायांकृतवीर्य्यजं ४५ द्वापरेवामनंदेवंकलौभरतमेवच नम

स्यन्तिमहाभागाभवेयुर्मुक्तिभागिनः ४६ इत्युक्त्वाभगवान्विष्णुरैभ्यंनामतपोनिधिं
तत्रांतर्द्धानमापन्नः पश्यतस्तस्यनारद ४७ इतितेकथितोत्पत्तिः क्षेत्रकुब्जाम्रकस्य
हि श्रुत्वेमांसर्वपापेभ्योमुच्यतेनात्रसंशयः ४८ इतिस्कान्देमायाक्षेत्रेकुब्जा
म्रकमाहात्म्ये ॥ १६ ॥ नारदउवाच ॥ कियन्मानंपरंक्षेत्रंकानितीर्थानितत्र
वै किंतत्रपुण्यंलभतेस्नानाद्दानात्तथार्च्चनात् १ उत्पत्तिंचैवमाहात्म्यंसर्वंवि
स्तरतोवद केनकेनफलंप्राप्तमत्रक्षेत्रेशिवात्मज २ केकेपरांगतिंप्राप्ताहृ
षीकेशाश्रयात्तथा सर्वंविस्तरतोब्रूहिश्रोष्यमाणायमेप्रभो ३ स्कन्दउवाच सा
क्रष्टंत्वयाविप्रकुब्जाम्रकस्तुतीर्थकं सुन्देश्वरीसमारभ्ययावद्धेमवतीनदी ४
तावत्कुब्जाम्रकंक्षेत्रंपापिनामपिमुक्तिदं करमानेस्थलेतत्रतीर्थानांपंचकंध्रुवं ५
तत्रापिविप्रश्रेष्ठानिस्वर्गदान्यपिदर्शनात् शृणुतीर्थानिपुण्यानिमुक्तिदानिपरात्मनो ६

मा०पु० मायातीर्थंपरंख्यातंयत्रदृष्टोजनार्दनः गंगाचयमुनाचापिद्वयंयत्रसमाश्रि
तं ७ तस्मिन्कृतोदकेविप्रकारयेत्कुलसप्तकं सकृत्स्नातोपिभवनंकुबेरस्यल
५० भेन्मुने ८ शृणुत्वन्निप्रवक्ष्यामिमायातीर्थस्यनारद सर्वपापहरांदिव्यांमो
क्षस्वर्गोत्तुदर्शनीं ९ पुराकृतयुगेविप्रःसोमशर्म्मेतिविश्रुतः तपस्वीनरपेस्स
श्चसत्यवादीजितेंद्रियः १० तपस्तताप परमंजितात्मासप्तवर्जितः ग्रीष्मेपंचत
पाश्चैववर्षायांवृष्टिसाहकः ११ हेमंतेजलधाराभिःसिंच्यमानःसमन्ततः इतिव
र्षसहस्रंवैततोभूद्दूर्द्धबाहुकः १२ एकपादेनतस्थौचशिलायांनियतासनः स
हस्रद्वितयंतस्ययय्यावेवंमहामते १३ वायुभक्ष्यसहस्रंचसहस्रंतूर्द्धपादकः ए रामः
वंवैतपमानस्यप्रसन्नोभूज्जनार्दनः १४ श्रीभगवानुवाच साधुसाधुमहाभाग ५०
सोमशर्म्मन्द्विजोत्तम वरंवरयभद्रंतेयदस्त्यभिहितंतव १५ प्रसन्नोस्मिन्नसंदेह

त्त्पमानेनसत्तुतः दुर्ल्लभंतवविप्रेन्द्र नास्तिचैलोक्यमंडले १६ सोमशर्म्मो
वाच यदिच्छसिवरंदातुंप्रसन्नोयदिवेमयि ज्ञानीयातवमायांहिमुग्धंचैलो
क्यकंयया १७ श्रीभगवानुवाच ममममायामहाभागनजानन्तिदिवौकसः ब्र
ह्माद्यायत्सुरास्सर्वाःसामायाममकीर्त्तिता १८ वर्षंतिचमहामेघाःसामायाममम
कीर्त्तिता ययानिर्ज्जलतांयांतिसामायाममकीर्त्तिता १९ चन्द्रोयत्क्षीयतेपक्षेप
संपूर्णत्वमेतिच मायैषाममविप्रेन्द्रयहनक्षत्रतारकाः २० हेमंतेर्त्तौचसलिलं
कूपकोसंविभातिच शीतलंचनथाग्रीष्मेसामायाममकीर्त्तिता २१ उदेतिसवि
ताप्राच्यांप्रतीच्यामस्तमेवच शोणितंचतथारेतःसंयुक्तंस्यान्महामते २२ गर्भे
चात्यद्भुतेजंतुस्तन्मायाप्रवलाममम जठराग्नौप्रदीप्तेहिगर्भांशंगतोमुने २३ मा य॰
तृभुक्तानुसारेणप्राणितिप्राणिकूटकः पूर्वजन्मसहस्राणिपापपुण्यकृतान्कृते २४

मा॰पु॰ विज्ञानात्यवशोजंतुर्गर्भेमायाबलेमम जानातिसुखदुःखेचतथात्मानंचवि
न्दति २५ अंगुल्यश्चरणोचैवभुजौशीर्षंकटिस्तथा पृष्ठंतथोदरंचैवदंतोष्ठपुट
५१ नासिका २६ कर्णादिचिबुकादीनिसर्वंमायाकृतंमम बधिरस्यापिव्यापारोंधस्या
पिहन्तुनेचतः २७ मूकस्यश्चेष्टनंज्ञानंसर्वंमायाकृतंमम मूढत्वंसंस्मृतोचैव
जातेमात्रेमहामते २८ धर्माधर्मपरिज्ञानंविस्मृतश्चतथामम माययामेमहाभाग
योनियन्त्राद्बहिर्गति २९ कर्मितुणादिवशाणिप्रेरितोपानवायुभिः निःक
म्यमममायायावशंप्राप्नोतिसत्वरं ३० जरायुजाश्चाण्डजाश्चस्वेदजाद्विजपुंगवः
उद्भिज्जाःप्राणिनश्चैवजायंतेनिजरूपतः ३१ श्वेतकृष्णादयोभावामाययाममदे
हिनां शब्दःस्पर्शस्तथागंधोरूपंचापितथारसः ३२ माययाममभाव्यंतेलीयंतेचाद्वि रामः
जेश्वर समुद्राश्चतथादिव्येर्जलेभौमैरलंकृताः ३३ पूर्यमाणानवर्द्धंतेमाययाम ५१

मसर्वतः वर्षासुवहुतोयाश्चसरितःपल्वलानिच ३४ सरांसिवृद्धिमायांतिशु
ष्यन्तेतपनेखिला एवमायाप्रभावोमेमेघागृह्णंतियज्जलं ३५ लवणंलवणा
ब्धेश्चवर्षंतिमधुरंपुनः एवमायाप्रभावोमेहिमवच्छिखरादधः ३६ मंदाकिनी
समाख्यातागंगाजाताततःपरं वन्योषधेवीर्य्यंनूपात्राणान्जीवयतिद्विज ३७ पु
नस्तएवचौषध्यानाशयंतितत्हैवहि आयुःक्षयपरिज्ञातंसर्ववीर्यंहराम्यहं ३८
जायमानोल्पतनुकोयौवनेचतथामहान् अवस्थायांचतृतीयायांजराव्याप्तश्चैव
स्तथा ३९ पश्चादिंद्रियनाशश्चसर्वंमायावलंमम अणुमात्रेश्वत्थवीजेवापितेङ्कु
रसंभवः ४० पुनःपश्चाद्दिकोत्पत्तिस्तथाशाखाप्रशाखिका जायंतेमाययाविप्र
पुनर्वीजंतथाङ्कुरा ४१ योयोविभूतिवात्वयंतद्दृरिडश्चतपोधनः मायामेताम
हंकृत्वातोषयामिदिवौकसः ४२ ब्रह्मासृजतिलोकंहिइतिसर्वेवदंतिहि मायामयंव

मा०पु० पुःकृत्वात्वहमेवसृजामिवै ४३ लोकावदं तिशक्रोयंदेवान्पालयतिद्विज अह
मेवेतिवपुषापालयामिदिवौकसः ४४ माययायमरूपेणनाशयनेचमयाजग
त् कौवेरंरूपमास्थायधनानांरक्षिताह्यहं ४५ इन्द्रमायांसमाश्रित्यवृत्रोवेना
शितःपुरा रुद्रमायांसमाश्रित्यत्रिपुरासुरनाशकः ४६ वायुमायांसमाश्रित्यप्रा
णिनांदेहसंस्थितः जाठराग्निरहंभूत्वाप्राणिनांदेहमाश्रितः ४७ चतुर्विधंपचा
म्यन्नंमायेषाममकीर्तिताः वाडवंरूपमास्थायसामुद्रंजलमन्वहं ४८ पिबामिमा
यया विप्रसमुद्रकृतसंश्रयः सामुद्रंरूपमास्थायसंधरामिजगद्धिहि ४९ लोका
नाश्रित्यभूरादीनूजगद्रूपोस्मिमायया सौरीमायासमाश्रित्यसंजयामिजगत्त्रयं
५० मायांमेघमयींकृत्वासंधरामिजलंतथा राजमायांसमाश्रित्यपालयामिस्व रामः
मायया ५१ अहमेवपुरामत्स्योवेदोद्धारंतथाकरं कौर्मीमायासमाश्रित्यधृतो ५२

वैमंदराचल: ५२ वाराहं रूपमाश्रित्य धरोद्धार: कृतो मया नारसिंहवपुर्धृत्वा हिर
ण्यकशिपुर्हत: ५३ वामनं रूपमास्थाय बलिर्नीतो रसातले भूत्वा परशुरामाहं
क्षत्रस्यांतकरो भवं ५४ भूमेर्भारापनोदश्च रामरूपेण वै कृत: कृष्णमायां समा
श्रित्य भूमिभारो हृतो मया ५५ योगमायां समाश्रित्य बदरीविपने स्थित: कल्की
भूत्वा म्लेच्छजातीन्नाशयामि स्वमायया ५६ यत्किंचिद्दृश्यते विप्र जगत्स्थावरजंगमं
मायैषा मम विप्रेंद्र सर्वमेतत्प्रकीर्त्तितं ५७ अयं मायाप्रभावो मे कथितस्तव विस्त
रात् यत्पृष्टोहं त्वया सर्वं मम मायाबलं महत् ५८ इति स्कान्दे मायावैभवे कुञ्जा
म्रकमाहात्म्ये सोमशर्म्मोपाख्याने ॥ २७ ॥ सोमशर्म्मोवाच प्रोक्ता माया त्वया
देव जगदेतच्चराचरं कथं परमजानेहं तव माया दुरत्ययां १ जानीयामिति तां देव
दृष्टा वरमिमं कुरु श्रीभगवानुवाच मम माया महाभाग दुर्गम्या च सुरैरपि २ अ

मा०पु० न्यंवरंस्त्रीणांबलंधनंरत्नंवसुंधरां अथवास्वर्गगमनंरंभासेवनमेवच ३
स्वच्छन्दगमनंचैवभूरादिषुमहामते अथचेच्छसित्रैलोक्येराज्यंनिहतकं
५३ टकं ४ अथचेच्छसिपुत्रादींस्तथावाचांप्रचारणं अवध्यत्वंसुरेन्द्राद्यैरजेय
त्वंसुरासुरैः ५ अमरत्वंतथान्यद्वैमनईहितमेवच ददामिसर्वंप्रवरंविना
मायांतपोनिधे ६ मायांद्रष्टुंनयोग्योसितपसांनिधिरेवहि सोमशर्मोवाच
नकांक्षेभगवन्किंचिल्लोकेवरमन्यंतथामहत् ७ मायांदर्शयमेस्वीयांवाञ्छितंमया
तपः स्कन्दउवाच वारंवारंमहाभागमुनिनासोमशर्मणा ८ याचितोपिरमा
कान्तोनददौतद्वरंद्विज एवंतेनतपस्तप्तंत्रिवारंविष्णुदर्शनं ९ वार्यमाणोपि राम:
हरिणापुनर्मायामयाचत भक्तानुकंपीभगवानुवाचयप्रभुर्मांगिरं १० मायांमे ५३
स्कं सोमशर्मस्त्वंमहीयांपरिवेत्स्यसे इत्युक्त्वांतर्दधेविष्णुस्तस्मिन्क्षेत्रेप्रभावहे ११

सोमशर्म्मापि गंगायां गतः स्नातुं द्विजोत्तम धृत्वा कुंडी त्रिदंडं च धौतमासनमेव
च १२ कमंडलुं च पुस्तं च सोमशर्म्मा शरित्तटे सन्यस्य प्रययौ स्नातुं गंगायां निय
तव्रतः १३ यावत्प्रविशते तत्र गंगायां नाभिमात्रतः तावद्दृष्टो मयासेन कच्छपे
न महामुने १४ निर्गीर्णश्च र्विंतश्चैव प्राणोत्यक्तो वभूव ह ञ्चाकृष्टोयमदूतैश्च वाय
वीयवपुर्मुनिः १५ मायानरकसामग्री ददर्श स महातपाः कृकचैः पाट्यमानाश्च कु
ष्यमानाश्च सर्वशः १६ ताड्यमानाश्च मुशलैर्हाहाकाररवोत्तथा ददर्श किंकरास्ते
च ददर्श परितो वहून् १७ सिंहाननान्लूकमुखान्विकिनान्विकिताननान्
केचिद्गर्ज्जंति केचित्तु साट्टहासास्तथापरे १८ भिंदि भिंदि छिंधि छिंधि भस्मभसापि
चापरः इति नानाभिधावाचः स श्रावयमग्रंदिरे १९ दृष्ट्वा पापगतीस्तेन तथाएण
गतिं मुने ञ्चासशुक्तो महाभाग ददर्श विविधा गतिः २० आशिभिश्छिद्यमानाश्च

मा॰पु॰ क्रस्तैपार्त्तिपीडिता निगडैर्बध्यमानाश्च तथैवायसनिर्मितैः २१ त्रिशूलेर्भि
द्यमानाश्च भिन्नाश्च छतरं तथा अपरे भेद्यमानाश्च भिन्नांगाश्च तथा परे २२ लो
५४ हस्तंभेषु तप्तेषु बद्धा दृष्टा मुनिस्तथा नदीवैतरणीतत्रपूयशोणितवाहिनी २३
तथाकृमिकुलैश्छन्नांतप्तांपूरिषकर्द्दमां संकीर्णापापिभिश्चापिक्रंदमानैरितस्त
तः २४ असिपत्रवनंचैवतथासंतप्तवालुकं रौरवंचमहाघोरंयोजनत्रयविस्त
तं २५ संतप्यमानंतीक्ष्णेनवह्निनाचसमंततः हाहारवशताकीर्णंमहारौरवमेव
च २६ योनिपुंसान्व्यमपथमैरं तामिश्रंचमहात्तिंरं महातामिश्रकंचैवसंभ्रमंचतथै
वचः २७ अमेयकृमिसंपूर्णंपुरीषभक्षणंतथा स्वमांसभक्षणंचैवकुंभीपाकंचदृष्ट
वान् २८ एतेचान्येचबहवोयातनानरकास्तथा दृष्टास्तेनमहाभागलंबमानास्तलब रामः
जे २९ पश्यन्महातपाविप्रस्ततःपापान्समीक्ष्यवै ततोब्रह्मपुरेविद्वान्नानाभोगपरिप्लुतः ५४

स्तृष्णारहितस्तत्तु दुःखेनरहितस्तथा भूर्लोकंचभुवर्लोकंस्वर्लोकंचमहर्जनं
३१ तपःसत्यंचपातालेष्वव्याहतगतिर्द्विजः यत्रेच्छतिसर्वगंतुंतत्रतत्रविमानगः
३२ जगामाप्सरगंधर्वकिन्नरैरुपशोभितः एवंवर्षसहस्रंचभुक्त्वादिव्यंचभोगकं
३३ पृथिव्यांचपुनर्जातोराजापरमधार्मिकः बुभुंजेचततोभोगान्राज्यप्राप्तान्म
हायशाः ३४ इष्ट्वाबहुविधैर्यज्ञैःसमाप्तवरदक्षिणैः पुनःस्वर्गंजगामापिभुक्त्वाभो
गांश्चशाश्वतान् ३५ ततश्चन्द्रस्यबिंबेचभूत्वानीहाररूपधृक् स्रवतेस्मतथौषध्यां
जीवश्चन्द्रस्यमंडलात् ३६ एतस्मिन्मंडलेकाचिन्निषादवनिताततः जाताम्रत्त नि
मतीतत्रगर्भाधानपराभवत् ३७ निषादेनतुयद्भुक्तंतत्रप्राणामृतात्मकः निषा
द्यायोनिर्यत्रैवसिक्तंमैथुनकर्मणा ३८ रेतःसंचलितोजंतुर्लिंगात्स्त्रीयोनिसं
चितः योनिरक्तेनसंयुक्तोजरायुपरिवेष्टितः ३९ द्विनेनैकेनकललंकठिनत्व

मा॰ पु॰ मगात्ततः बुद्बुदाकारतांप्राप्तःपंचरात्रेणसद्द्विजः ४० ततःपेशीत्वमापन्नोमांसस्यास
ह्नरात्रतः मासार्द्धेनमांसपेशीरुधिरेणपरिप्लुताः ४१ कठिनत्वंततःप्राप्नोतिपंचविंशति
५५ रात्रिषुः मात्वशिरःसमुत्पन्नंग्रीवास्कन्धौतथोदरः ४२ पृष्ठवंशास्तथोत्पन्नाःपंचधां
गानिचक्रमात् पाणिपादौतथापार्श्वौकटिजानूद्वितीयके ४३ त्रिभिर्मासैकरांगुल्यः
धयश्चमहामुने मासाचतुर्थेनेजाताःसर्वांगुल्यस्तपोनिधे ४४ नासिकाकर्णनेत्रा
णिपंचमेमासिकेस्फुटं दंतभूमिर्नखागुह्यंजीवश्चजठरस्थितः ४५ छ्रंगछिद्रा
णिषष्ठेचपायुमेढ्रंतथामुने नाभिश्चसप्तमेमासिजातातस्यमहामते ४६ लोमा
निचमहाभागशीर्षकेशास्तथोद्भताः विभिन्नावयवत्वंचसर्वंजातंतथाष्टमे ४७ रामः
ववर्द्धजठरेजन्तुसंस्मरन्पूर्वकर्मतत् नानाजन्मानिज्ञातानितथाचोच्चावचानि ५६
च ४८ जठराग्निसमुद्विग्नःकतिवारंस्वजन्मसु स्वकर्मणाकर्महीनोज्ञातोहंदेहदुः

खभाक् ४९ नमेमृत्युःकर्महीनास्तूज्ञान्निवद्दुस्यातिपीड्रितः नानायोनिसहस्राणिम्य
नुभूतानिवैमया ५० मातापितृसहस्राणिपुत्रदारास्तथैवच कुटुम्बभरणासक्तिर्जी
ताचममसर्वदा ५१ सत्कर्मनकृतंयेनज्ञातोमुक्तिविवर्जितः नज्ञानेयातकंतद्धै
येनजातोस्मिगर्भगः ५२ स्त्रीशरीरोभाग्यहीनोनिषादीगर्भमागतः ज्ञातंमेदर्शनं
विलोसत्पस्तत्वंचमेमहत् ५३ केनकर्मविपाकेननिषादीगर्भसंस्थितः किंकरोमि
क्कगच्छामिपीड्यमानाग्निनामुहुः ५४ भक्ष्याभक्ष्यविधिश्चैवनास्थिरोममसांप्रतं अत
ऊर्द्धंकदाचिद्धिभविष्यतिगतिर्वहि ५५ कर्तव्यामेविस्तुचिंतागर्भवासोयतोनहि इ
तिवैचिन्तयोद्विग्नःसवैब्राह्मणसत्तम ५६ दशमेमासियोनेस्तुकुर्वन्मातुःप्रपीडयन्
पीड्यमानःस्वयंचैवनरकात्पातकीयथा ५७ निर्गतास्त्रिस्वरूपेणस्पृष्टःसंसारवायु
नः जायमानातुसाकन्यारुरोदस्तुधयावृता ५८ अज्ञानतीमहामायांवैलवीविस्तुतत्परां

त्रां

मा॰पु॰ विरामूत्रपरिक्लिन्नांगीस्तनपानपरायणा ५९ वक्तुंकिमपिनोशक्तानगंतुंचक
चित्क्षणे एवंवाल्येपिदुःखानिह्यनुभूतानिचैतया ६० क्रमेणायौवनाक्रांताजाता
५६ नैषादकन्यका पित्रादत्तापिकस्मैचिन्निषादायमहामते ६१ तत्रापिपुत्रभर्त्रादि
संयुतासीत्क्रमेणसा एवंजातानिपंचाशद्वर्षाणिद्विजपुंगव ६२ एकदासानदीतीरे
गतास्नातुंमहामते यावत्स्नातिमहाभ्रुद्रातावत्कच्छपमूर्त्तिना ६३ कालेनसंगृहीता
सापुनर्जातायथापुरा स्नातासमागतोयद्वत्त्रिदंडीदंडकुंडिकां ६४ गृहीत्वावाससीत
ह्रत्यश्यतांवैतुपश्यतां एतस्मिन्नेवकालेतुनिषादःक्रोधमूर्छितः ६५ मयायष्टिंगृ
हीत्वातुतामन्वेष्टुंसमाययौ अन्वेषमाणःसततंतीरेतीरेविशेषतः ६६ वनानांचैव
कुंजेषुवप्रेषुतटवीचिषु एवमन्विष्यतस्तस्यनिषादस्यमहामते ६७ दिनंसर्वंक्षयं रामः
जातंप्रभाताचैवशर्वरी विललापतरोरग्रेगंगातीरेसमाश्रितः ६८ हाप्रियेक्वगता
सित्वंत्यक्त्वामांपुत्रदारिका किंकरोमिक्वगच्छामिकथंजीवंतुरंगजाः ६९ कांमांप्रिये ५६

चिन्तयानं शयानं शयने स्थिताः मधुरालापसंश्लेषैश्च तूर्णीमाश्वासयिष्यति ७० स्त
नंधयश्च स कथं भविष्यति दिनात्यये मातर्मातः पुनर्मातरित्युक्त्वाश्रुपरिप्लुतः ७१
रोदयिष्यति मां चैव तथान्यान् ज्ञातिबांधवान् क्वचित्त्वं परिहासाय लीना पुलिनसंस्तरे
क्वचिन्मम ये मद्दृष्टुं स्थिता किं जातु वेश्मनि क्वचित्त्वां व्याघ्रसर्पाद्यास्त्वद्दूरस्तु विवर्जि
तां क्वचित्त्वं गह्वरे तन्वि गता नीता च राक्षसैः इति लालप्यमाने तु तत्र तस्मिन्निषादजे ७४
मुमोह मायया विष्टो दृष्ट्वा तं तादृशं मुने उवाच वचनं दीनो बाष्पकंठ सगद्गदं ७५ मा रोदी
स्त्वं निषादेश कालो वै दुरतिक्रमः अप्रमादेन स्थातव्यं शत्रुमित्रेषु सर्वदा ७६ इति तस्य
वचः श्रुत्वा बाष्पगद्गदया गिरा उवाच सह सागत्य तत्र ब्राह्मणसन्निधौ ७७ भो भो द्विज
वरः श्रेष्ठ क्व गता सा मम प्रिया तया विना क्षणमपि न जीवेयं सुदुःखितः ७८ कया च वन
कुंजेषु नदीनां संगमेषु च वहत्कुटजवातेषु पर्वतानां च मूर्द्धसु ७९ तमालमालाजाले

मा॰पु॰ पुंस्कूजितेषु वरीनांसंगमेषुच वहनकुटजयातेषु कोकिलैः परमयिष्यामिवि
५७ प्रेशतथाविपिनपङ्क्तिषु कथयस्वमहाभागक्वगतासाप्रियंवदा प्राणेभ्योपिमम
सौम्यरक्षस्वममवालकान् ८१ इतीरितंतस्यवचोनिशम्यवैनिषादपुत्रस्यविमो
हितोद्विजः सवाष्पकंठोक्तवंतवाक्योजगादभूयोजगदीशमोहितः ८२ अहंत
वस्त्रीभवनाधिवासिनीस्थितानिषांश्चरगच्छमंदिरे एतावदेवाभवदत्तिनोतवसं
बंधकःकर्मगतानुसारिकः ८३ रक्षस्वचेमानतिवालकान्मेत्वमेवतेषांजननीपिता
तु कनिष्ठकोयःसततंहिरक्ष्योगच्छस्वगेहेवचनंकुरुष्व ८४ निष्ठाकृष्टिर्वर्धमाना
हिदेशेपुत्रेतेत्तानिष्ठकृष्टेनिकृष्टा दुष्टाव्यष्टानीरषानष्टकाःस्युःपुत्राएतात्तेनरारा ये
मृजीवा ८५ एवंतुद्वंवाक्यमुक्त्वाद्विजस्तुरुरोदोच्चैस्तेनशाकंमुनीश विलोर्मीयासं रामः
तप्तोत्यस्वतंत्रोहाहेतुत्वापातयामासवाष्पान् ८६ व्याधोपितच्चाश्रुनदीप्रवालासं ५७

ययामास दिमोहनार्थकं हरो हृयादे पतितो जगाद भूयश्च देवेश विमोहितं परम् ८७
एते वै वालका मह्यं मोहयन्ति तरां मुने गच्छ मे मन्दिरं शीघ्रं त्वां मत्वा मातरं तथा ८८ जीवि
ष्यन्ति तथाहं च रक्षनो म्रीयमाणकान् रक्षा त्वया प्रकर्त्तव्या गृहे गत्वा यथावनात् ८९ आ
नेया मृगपक्षाद्या भक्षणार्थं यथा पुरा तु तवैव सर्वं भवनं वालकाश्च धनं तथा ९० इति
श्रुत्वा वचो विप्र निषादस्य नदीतटे चकार मनसो भावं गृहे गन्तुं त्वरान्वितः ९१ एतस्मि
न्नन्तरे तत्र न व्याधो न च वालका ददर्श कुण्डं दण्डं च धौत्रं पात्रं स्थितं तदा ९२ दृष्ट्वात
न्महदाश्चर्यं हरिमायावशो द्विजः किमेतद्धि किमेतद्धि चकितो भून्महामते ९३ स्मृत्वा
तन्मरणं चैव नरकाणां च दर्शनं गर्भवासं च नेषा ह्यातथा वै स्त्रीस्वरूपतां ९४ तेषां मा
याच पुत्रेषु धनेषु च तथा पतो परमं खेदमापन्नो दुरात्माहं न्वशंस्वलु ९५ यस्य मे तादृ
शी जाता गतिर्विप्लोस्तु चिन्तनात् अभक्ष्यं भक्षितं चैवापेयं पीतं च वै मया ९६ अगम्या

 गमनं चैव कृतं यद्दुरात्मना भवित्री का गतिर्मे हि कृतपापस्य सर्वदा ९७ पापादस्मा
 त्कथं मे च निष्कृतिर्भविता तथा तपश्चर्या कृता पूर्वं प्राप्तं दुःखमनंतकं ९८ इदानीं पा
पकर्माभिर्भविता किं परत्र मे इति तच्चिंतयातस्य द्विजस्य नरपुंगव ९९ भक्तानुकंपी
भगवान्प्रत्यक्षं निजगाद ह शंखचक्रगदापद्मधरो बाहुभिरन्वितः १०० पीताम्बरल
सत्कान्तिर्वनमालाविभूषितः श्रीवत्सवक्षास्तेजस्वी नवनीरदरूपधृक् १ अनंतम
णिमुक्ताभिर्ललितं मुकुटं तथा धारयन्वै त्रिलोकीशो रमया सहितः प्रभुः २ रुदंतं
तं समासीनमधोवक्त्रं विमोहितं उत्तिष्ठोत्तिष्ठ भद्रं ते तपोराशे महामते ३ त्वत्समो
नास्ति त्रैलोक्ये मद्भक्तो विजितेंद्रियः धन्योसि कृतकृत्योसि न ते दुर्गतिरस्ति हि ४
न त्वया भक्षितं किंचिन्न पीतं न कृतं त्वया न ते भूत्मरणं विघ्न न ते जाठरवेदना ५
न ते स्त्रीलस्य संप्राप्तिर्न निषादगृहे जनि न विवाहो न पुत्राद्यो नैतत्सर्वं प्रपंचितं ६

यत्त्वयायाचितंभद्र तपश्चर्याफलंपुरा सेयंमायामयाविप्र दर्शिताप्रियलिप्सुना ७
एतत्येवपरंमूढोनजानातिपरायणं त्वंतयामोहितोविप्र दृष्टवानिदमद्भुतं ८ स्वाव
ज्ञानचतेकार्य्यंमायारूपमिदंजगत् स्वभावएषमायायाः प्रपंचःसार्वकालिकः ९ च्य
नात्मनिशरीराद्यावात्मबुद्धिर्हियामता तयासंमोह्यतेसर्वंजगदेतच्चराचरं ११० पर
मात्मनोनजन्मापिमरणंनचवेदना नवृद्धिर्नचवैह्रासोनबाल्यंनचयौवनं ११ ने
वावार्द्धिक्यभावोस्तिनित्यस्यपरमात्मनः ममचेष्टास्वरूपस्यस्वभावोयंप्रवर्त्तते १२
संसारमूलभूतासामायामेद्विजपुंगवः शक्यतेसायदित्यक्तुंप्रसादेनममप्रभो १३
तदातरतिसंसारंनानादुःखभयंचलं अतःपरंमहाभागमायामेसादुरत्यया १४ व्याप
यिष्यतिलोनेवययासंसृज्यतेजगत् इदंचपरमंस्थानंसंसारातापनाशनं १५ माया
तेदर्शितायेह ततोमायाभिधंत्विदं तीर्थंपापवनाग्निर्वैसद्यःशुद्धिकरंस्मृतम् १६

यत्त्वयायाचितंभद्र तपश्चर्य्याफलंपुरा सेयंमायामयाविप्र दर्शितापियलिप्सुना ७
एतयैवपरंमूढोनजानातिपरायणं त्वंतयामोहितोविप्र दृष्टवानिदमद्भुतं ८ स्वाव
ज्ञानंचतेकार्य्यमायारूपमिदंजगत् स्वभावएषमायायाः प्रपंचःसार्वकालिकः ९ च्य
नात्मनिशरीराद्यावात्मबुद्धिर्हियामता तयासंमोह्यतेसर्वंजगदेतच्चराचरं ११० पर
मात्मनोनजन्मापिमरणंनचवेदना नवृद्धिर्नचवैक्लेशोनबाल्यंनचयौवनं ११ ने
वावार्द्धिक्यभावोस्तिनित्यस्यपरमात्मनः ममचेष्टास्वरूपस्यस्वभावोयंप्रवर्त्तते १२
संसारमूलभूतासामायामेद्विजपुंगवः शक्यतेसायदित्यक्तुंप्रसादेनममप्रभो १३
तदातरतिसंसारंनानादुःखभयंचलं अतःपरंमहाभागमायामेसादुरत्यया १४ व्याप
यिष्यतिलोकेनवययासंसृज्यतेजगत् इदंचपरमंस्थानंसंसारातापनाशनं १५ माया
तेदर्शितायेद्द ततोमायामिधंत्विदं तीर्थंपापवनाग्निर्वैसद्यःशुद्धिकरंस्मृतम् १६

मा०पु० येनराः पिंडदानंहिकरिष्यंतिमहाशयाः तेषांगयाश्राद्धशतैः किंकर्त्तव्यंकृतैस्तथा १७
दानमत्रकुरुक्षेत्रवद्धितोष्टगुणंतथा मायाकुंडेतथास्नानंकोटिकोटिगुणंभवेत् १८
५९ स्नानंदानंजपोहोमःस्वाध्यायपितृतर्पणं सर्वंकोटितथाकोटीभविष्यतिनसंशयः १९
मायाकुंडमिदंमायाक्षेत्रश्रेष्टतमंस्मृतं स्कन्द उवाच इत्युदीर्य्यसभगवान्महाविष्णु
र्महामते १२० अंतर्दधौवास्तणास्यपश्यतःसोमशर्म्मणः आश्चर्य्यंपरमंलेभेसोमश
र्म्माद्विजोत्तमः २१ तत्रैवसंस्थितोविप्रदृष्टवान्मुनिपुंगवान् स्नातुंसमागतांस्तेचा
पृच्छंतमहदाशयाः २२ किंकृताशीघ्रताविप्रमज्जनेचाघमर्षणे इतितेषांचवचनं
श्रुत्वामायावलंचततत् २३ नमुमोहमहाभागरूपयाजगतीशितुः सोपिकालेनके
नापिसायुज्यंप्राप्नुवान्परं २४ इतितेकथितंविप्रमायातीर्थस्यवैभवं श्रुत्वायत्सर्व रामः
मायाज्ञोलिप्यतेनहिमायया इदंस्थानंपरंगोप्यंभवमुक्तिकरंध्रुवम् १२५ इति ५९

स्कान्दे मायाक्षेत्रे कुब्जाम्रकमाहात्म्ये सोमशर्म्मोपाख्यानम् १८ स्कन्द उवाच
अथान्यत्संप्रवक्ष्यामि तीर्थं परमपावनं तस्मादूर्द्ध्वप्रदेशे हि धनुषां पंचविंशतो १
कौमुदं नाम तत्तीर्थं त्रिषु लोकेषु दुर्ल्लभं यत्र स्नात्वा नरो विप्र सोमलोके महीयते २
कार्त्तिके च तथाषाढे माघे मार्गशिरे तथा स्नानं कुर्वंति ये प्यत्र ज्ञानाद्ज्ञानतो पि वा ३
प्राप्नुवंति परं स्थानं यत्र गत्वा न शोचति यदि कश्चिद्भाग्यवशात्प्राणांस्त्यजति तत्र वै ४
पुमान्वाथ यदि वा स्त्री नारी वा पापसंयुता: प्रयाति परमाल्लोकान्पुनरावृत्तिदुर्ल्लभान् ५
तस्य चिह्नं प्रवक्ष्यामि यथा तज्ज्ञायते परं कुमुदस्य तथा गंधो लक्ष्यते मध्यरात्रके ६
अकस्माच्चन्द्रिका तत्र दृश्यते तीर्थराजके पुरा तत्र महाभाग चन्द्रो वै तप्तवांस्तप: ७
दिव्यवर्षसहस्रं च महादेवमनुस्मरन् तत: प्रसन्नो भगवान्संतुष्टो वृषभध्वज: ८
प्रादात्स्थानं ललाटे स्वे चन्द्राय ध्रुवमुत्तमं कौमुदस्य तु मासस्य राकायां यन्निशाकर: ९

मा०पु० वरंचप्राप्तवान्रुद्रात्तीर्थंकौमोदकंततः तस्यैवदक्षिणेभागेशिवश्चन्द्रेश्वराभिधः १०
६० यस्यदर्शनमात्रेणनश्यंतेपापकोटयः चन्द्रेश्वरंसमभ्यर्च्यस्नात्वावैकौमुदेह्रदे ११ पु
ष्कलांलभतेसिद्धिंविष्णुलोकंचगच्छति अन्यच्चतेप्रवक्ष्यामितीर्थंसार्षपकंपरं १२
यस्यदर्शनमात्रेणशुद्धोभवतिमानवः तस्माच्छरद्वयेपुण्यंसर्वपापप्रणाशनं १३
यत्रब्रह्माचरुद्रश्चविष्णुश्चैवपुरासुराः वापयामासुरत्यर्थंशार्षपान्यज्ञहेतवे १४
यत्रदक्षोमहातेजागंगाद्वारसमीपतः चकारविपुलंयज्ञंयत्रदग्धासतीपुरा १५ त
तश्चेदंमहातीर्थंनाम्नाशार्षपकंस्मृतं यत्रस्नात्वानरोयातिलोकान्पुण्यान्सनातना
न् १६ अथान्यन्मुच्यतेप्राणैर्महापापैर्युतोपिवा सगच्छतिपरंस्थानंयत्रब्रह्मादयःसुराः रामः
यदिभाग्यवशाद्विप्रवैशाखेस्नातिमानवः तस्यपुण्यफलंवक्तुंकल्पेनापिनशक्यते १७
सर्वतीर्थेषुयत्पुण्यंसर्वयज्ञेषुयत्फलं तत्फलंलभतेतत्रस्नानमात्रेणमानवः १८ ६०

तस्य चिह्नं प्रवक्ष्यामि मध्याह्ने शृंगरूपधृक् समायाति रविः स्नातुं रविवारे विशेषतः २०
अन्यच्च ते प्रवक्ष्यामि तीर्थं कुण्डाग्रके महत् नाम्ना पूर्णमुखं ख्यातं देवानामपि दुर्लभं २१
यत्र वै स्नानमात्रेण सोमलोकं स गच्छति ज्ञेयं तत्रोपि सलिलं प्रीते गंगाजले पुनः २२
यस्य दर्शनमात्रेण सर्वपापैः प्रमुच्यते सोमेश्वरं महालिंगं जलमध्ये प्रवर्त्तते २३
जलमध्ये च संपूज्य शिवलोके महीयते शतवर्षसहस्राणि दिव्यभोगसमन्वितः २४
स्मा ततस्तमात्परिभ्रष्टो ब्राह्मणः शुद्धवंशजः जायते शिवभक्तश्च सर्वशास्त्रविशारदः २५
पुनर्मुक्तिमवाप्नोति मत्वा यत्तीर्थके परे द्वादश्यां शुक्लपक्षे तु यस्तत्र कुरुते क्रियां २६
सर्वा ह्यनन्तफलदा तस्मात्पापं विवर्जयेत् प्राणांस्त्यजंति वाप्यत्र तद्भुतनव्रततत्परः २७
विष्णुर्ददाति साक्षाद्वै दर्शनं चामृतं तथा तस्माद्बाणप्रमाणोहि तीर्थं करवीरकं २८
माघमासे सिते पक्षे द्वादश्यां करवीरकः पुष्पितो दृश्यते तत्र तस्मात्तज्जायते शुभं २९

मा०पु० पितृभ्यश्चाम्बुदानंहियैःकृतंशुभलिप्सुभिः कल्पकोटिसहस्रैस्तुविमानवरमाश्रितः ३०
६१ मोदतेभवनेविष्णोःपितृभिःसहनारद: ततोगच्छेत्पुंडरीकेतीर्थेपापवनानले ३१
यत्रचक्रप्रणोवैचरतेकमठोमुने मध्याह्नेतत्रदेवेशोह्यायातिनिजमुद्धये ३२ त
त्रस्नात्वामहाभागपुंडरीकफलंलभेत् यस्तत्रत्यजतेप्राणान्सयातिहरिमव्ययं ३३
यस्तत्रकुरुतेदानंत्रुटिमात्रंहिरण्यकं दशानांपुंडरीकाणांयज्ञानांफलभाग्भवेत् ३४
अथान्यत्तेप्रवक्ष्यामितीर्थंकुब्जाम्रकेस्थितं पुंडरीकस्यतीर्थस्यवामभागेधनुःशते ३५
गुह्यमेतच्छुभंकुंडंज्ञायतेनैवपापिना येनस्नातंचतीर्थेषुयेनवैपूजनंहरेः ३६
कृतंनहिविजानातितीर्थंपरमपावनं यत्राग्निःसंस्कृतोदेवैःपुराप्रादुर्बभूवह: ३७
तस्मादिदंपरंतीर्थमग्निसंज्ञागतंशुभं धन्यःसएवलोकेषुपुण्यात्मामुनिपुंगव: ३८ रामः
अग्नितीर्थंयेनदृष्टंविष्णुसायुज्यदंपरं यदत्रक्रियतेकर्मसर्वंतत्स्यादनन्तकम् ४० ६१

यत्रवैस्वानमात्रेणब्रह्महत्यायुकोटिभिः संयुक्तोपिनरःपापैर्मुच्यतेनात्रसंशयः ४१
त्रैलोक्येधन्यतांयातिदर्शनादर्शना॰ कलौत्र अग्निर्थस्यसंयोगोयावन्नोभवतिद्विज थवित्
तावत्कलिभयंविंद्यात्स्पृष्टेपापक्षयोभवेत् ४३ इतिस्कान्देप्रायासेत्रेकुब्जाम्र
कमाहात्म्ये॰॥२९॥नारदउवाच कथंवैश्वानरोदेवःसंस्तुतोदेवतर्षभः किमर्थं
चागतोदेवाःकुब्जाम्रेसेत्रउत्तमे १ स्कन्दउवाच श्रृणुब्रह्मपुरावृत्तंपापघ्नंसर्वका
मदं यथावैश्वानरोदेवःप्राप्तवांच्छापमीशतः २ एकदाहिमशोभाढ्ये कैलासेपुम
याहृते शिवश्चशिवयासार्द्धंक्रीडन्नास्तेरसाप्लुतः ३ शालेस्तालेतमालेश्चखर्जूरैः
पनसैर्मठैः भूर्जैर्भजकैश्चैवकुंकुमैश्चम्पकेद्रुमैः ४ घनेनीहारसंयुक्तेरजतेनेव
संवृते तत्रस्वर्णमयावृक्षाःपक्षिणश्चहिरण्मया ५ नानाप्रसूनशोभाढ्ये धातुरागवि
भूषिते रमयामासदेवेशोगिरिशोगिरिजयासह ६ वसंतश्चसदातत्रसमयेगानुनासह

मा०पु० पुंस्कोकिलरुतैश्चैवतथामधुपनिःस्वनैः ७ पुष्पितानिवनान्यासन्विचेरुर्भ्रमरास्त
तः एवंतस्मिन्वनोद्देशेक्रीडायांसंस्थितौशिवौ ८ एतस्मिन्नंतरेतत्रदर्शनार्थंसुमा
६२ पतेः आजगामसुनासीरस्त्रिदशौघसमन्वितः ९ यावद्गच्छतिकैलाशेप्रणामंतु
सदाशिवं तावन्निवारितोनन्दीगणेनप्रमथेशिना १० एकान्तसंस्थितोदेवःशिव
यासहितःप्रभो नकालोदर्शनस्यायंगच्छध्वंत्रिदशेश्वराः ११ इत्युक्तोनन्दिनाश
क्रोजगादाग्निमितःस्थितं त्वमग्नेसर्वभूतानामंतश्चरसिसर्वदा १२ त्वयातत्रगं
तव्यंविलीनेनमदाज्ञया सत्यंवायदिवासत्यंवदतिप्रमथोह्ययं १३ शिवान्तःकिं
प्रकुरुतेसर्वंविज्ञायचेष्टितं शीघ्रंत्वयात्रगंतव्यंमाविलंबंकुरुप्रभो १४ इत्याज्ञां
शिरसाधृत्वावह्निःकालप्रचोदितः जगामतत्रदेशेहियत्रास्तेभगवाञ्छिवः १५ राम
अग्नेर्विचेष्टितंज्ञात्वामहादेवोदिवस्पतेः कारितंचतथासोऽत्याशशापाग्निंवरान्वितः १६ ६२

यज्ञभागाँश्च देवानां नाशमेष्यति सत्वरं अयमग्निश्च लोकाद्धि विनश्यति न संशयः १७
इतीरितं शिवस्याग्निर्न्नाशं स्वरागतस्तथा इन्द्रो वै देवतैः सार्द्धं वेपमानो गृहं ययौ १८
निःस्वाध्यायवषट्कारं त्रैलोक्यमभवत्क्षणात् निश्चेष्टाश्च तथा त्यासन्प्राणिनो वह्निव
र्जिताः १९ प्रलयेयानि कर्माणि तान्यासन्वह्निसंक्षये उल्कापाताश्च शतशः पेतुर्वै
धरणीतले २० इन्द्रोपि देवतैः सार्द्धं यत्रासौ क्षीरोदसागरे तत्रस्थितं रमानाथं ब्राह्मणा
सहितस्तदा २१ ब्रह्मापि तत्र गत्वा च विष्णुं स्तोतुं प्रचक्रमे विनयावनतो भूत्वा वास
वेन समन्वितः २२ ब्रह्मोवाच नमस्ते भगवन्विश्वचराचरगतेऽप्रभो रमापते रमाधी
श कृतदैत्यविनाशनः २३ मुरारये नमस्तेस्तु नमो भक्तजनाश्रयः नमस्तेस्तु सुरराजाय
सहस्राक्षाय ते नमः २४ ऋग्वेदाय नमस्तुभ्यं यजुर्वेद नमोस्तु ते सामवेदाय देवाय नमो
ऽथर्ववेदस्वरूपिणे २५ अग्निनाशेन सर्वेषां नाशो भवति निश्चितं निःस्वाध्यायवषट्कारं त्रैलो

मा०पु० कंसचराचरं २६ विनस्यंतेरमानाथवयंसर्वेसवासवाः त्वयैवेदंकृतंपूर्वमकालेप्र
यमेतिच २७ रुद्रशापाग्निनिर्दग्धोनष्टोग्निर्भुवनत्रये यद्वायदामहाविष्णोस्तानिभव
६३ तिसंस्थितौ २८ तदात्वयैवसर्वंहिकृतंशत्रुविनाशनं पुनर्यथावीतिहोत्रेजायतेचत
थाकुरु २९ श्रीभगवानुवाच गच्छध्वंत्रिदशास्सर्वेकुब्जाम्रक्षेत्रउत्तमे तत्राहंच
शिवश्चापिसंस्थितौचतुराननः ३० तत्रस्थाराधयिष्यामोभगवंतंमहेश्वरं नित्यंस
न्निहितस्तत्रपिनाकीत्रिदशेश्वर ३१ स्कन्द उवाच इतिश्रुत्वामतिंतस्यैवब्रह्माद्या
स्त्रिदिवौकसः गताःकुब्जाम्रकेक्षेत्रेशिवंस्तोतुंप्रचक्रमुः ३२ देवाऊचुः प्रतिष्ठित
वीश्वरमार्यवृत्तिः स्तुतिप्रवृत्तेनवमालतीमे दृग्सारवंद्याखिलमूर्त्तकंदेनन्दीशव
न्दीभवचन्द्रचूडे ३३ क्षीरसेसागरकालकूटकंकंठप्रचण्डापरवारहृद्ये विद्या रामः
नवद्येमितवैद्यविद्येसिद्धप्रसिद्धेविदुबुद्धिशुद्धे ३४ भावःस्यान्नोभीतिभोजोशभाजो ६३

भूयः श्यामः श्वेतभस्म्भस्महरेशान् केशावासेनेननीतांस्वरूपाद्भूते शोभूभीमभूपांतराः
३५ स्फुरद्विधुदलादिकं कलितकालिसंमालिकं सुनेत्रवनमंजरीभ्रमभ्रमद्भूरिगंग
स्पदं वमद्विषपरंपराभयकरो हि भूषाधरः धराधरसुतावरंप-रमहो भजामो वयं
३६ प्रपन्नपरमापहं वृजनन्दोहमोहापहं जलौघवरधीप्रदं धरवरधियार्थप्रदं ज
रामरणकालिनं भवलाशसंशालिनं गलेवलितकालिकं भुवनपालकंचालकं ३७
भजेम गजचर्मणा प्रकरमुद्धतल्कमर्णाः सुशोभित कटोत्कटं नटितभूरितवं चज्ज
टं चराचरपरंपराहरणाधीरमंधासुरासुरेशः मूर्त्तिकारकं जितमनोजकंतारकं प्र
र येमनवभावनप्रखंचण्डनया हतः प्रकीर्णमणिमंजिरीमुकुटकूटभूताहृतं महे
शभवनंवनं परमसाएनः भाविताविरोधिविविधार्थदं विबुधवंद्यपादेनताः ३९
स्कन्द उवाच इति देवैस्तुतो देवो भगवानुपार्वतीपतिः आविर्बभूवतरसा वृषस्थ

मा॰पु॰ श्चन्द्रशेखरः ४० उवाचवचनंदेवान्ब्रह्मादीन्जातवेदसं इच्छतोभक्तिनम्रासान्मे
घगंभीरनिःस्वनः ४१ ईश्वरउवाच भोभोदेवगणाःसर्वेयदर्थेपरिचिंतया समागताः
६४ स्ततोहंचसंतुष्टःप्रददामिवः ४२ मन्नेत्रप्रभवेनाशुवह्निनाकुरुतक्रतुं आप्याययध्वं
तथाभूतानयध्वंददतोमम ४३ स्कन्दउवाच इत्युक्तासहसाभीमोनेत्रज्वालांभयान
कां ददृशेदीनान्महाभागल्लेलिहानांत्रिलोकिकं ४४ तांज्वालांशिवनेत्रोत्थांदृष्ट्वाचलाः
सुराऽसुराः प्रसादयामासुरपिस्तोत्रेणनेतमस्तकाः ४५ देवाऊचुः अग्निर्वैश्वान
रोवह्निःकृष्णवर्त्माभयानकः प्रभवोविभवश्चैववीतिहोत्रस्तनूनपात् ४६ भक्ष्योभी
मोभीमनेत्रसमुत्थोदेहसंस्थितः त्रैलोक्यदीपकोभानुःस्वर्भानुःसर्वगस्तथा ४७ चि
त्रभानुःशीतहंताशीतसंस्थःकृपाकरः धेनुकेवडवाजन्माजाठरोजठरस्थितः ४८ रामः
यज्ञनेतायज्ञभोक्ताभक्तिगम्योलयंकरः कृपीटयोनिःशोचिष्मान्ज्वलनोजातरूपदः ४९ ६४

जातवेदा वेदसंस्थो ह्याश्रयाशो महाप्रभुः दानवारिर्ज्वलत्केशो मद्गुनो दीनवत्सलः ५०
स्कन्द उवाच अग्नेरेतानि नामानि यः पठेत्प्रयतो नरः सर्वसिद्धिमवाप्नोति शतयज्ञ
फलं लभेत् ५१ मंदाग्निर्येन रोगेवि ग्रस्तु भक्त्या प्रतिपत्तितो नामामृतं पिबेन्नित्यं त्रिवा
रं नियतः शुचिः ५२ मंदाग्नितस्य नश्येत सर्वरोगक्षयस्तथा धन्यो भवति लोकेषु पूत
त्मा नात्र संशयः ५३ स्तूयमानस्ततो वह्निः शान्तात्मा ह्यभवत्क्षणात् ततो देवा महेशा
द्यास्तीर्थमेतत्समाश्रिताः ५४ ततो मुनिः शुभं तीर्थमग्निसंज्ञं स्मृतं त्विदं यत्र स्नात्वा शु
मान् लोकं प्राप्नोति च परं पदं ५५ तस्यैवमभिधानं तु कृत्वा देवाः सवासवाः प्राप्याग्निं
शिवतो विप्र यथास्थानं ययुस्ततः ५६ इति ते कथिता वह्नितीर्थोत्पत्तिः शुभंकरी यां
श्रुत्वा पितरो यांति पूताश्च स्वर्गलोककं ५७ आषाढ्यां चैव द्वादश्यां कार्त्तिक्यां च विशे
षतः तथा मार्गशिरे मासि द्वादश्यां दर्शके पि वा ५८ यः करोत्यग्निपूजां वै स्नानं दानं जपं त

मा०पु० था सयातिपरमाल्लोकान्पुनरावृत्तिदुर्लभान् ५९ चिह्नं तत्र प्रवक्ष्यामि येन तज्ज्ञायते
शुभं उत्सं भवतिहे मन्त्रेत्यष्टधारं महामते ६० गंगाभवतितत्रोष्णायीष्मशीतातिमात्र
६५ तः यस्तत्र मुंचते प्राणान्दिव्यान्लोकान्स गच्छति ६१ कोटिवर्षसहस्राणि विमान
वरमास्थितः अप्सरोगणसंयुक्तो भोगभाग्भवति ध्रुवं ६२ भुक्त्वा भोगं पुनर्मर्त्ये राजा
भवति धार्म्मिकः पुत्रपौत्रैः परिवृतः शत्रुपक्षविवर्जितः ६३ संप्राप्तिपृथिवीमेतां
ससागरवनावृतां अन्ते तद्वैष्णवं धाम संप्राप्नोति न संशयः ६४ एतद्देवपरं सेव्यं तीर्थं
पुण्यतमं स्मृतं तरंति मानुषा यस्माद्घोरसंसारसागरम् ६५ इति स्कान्दे मायाक्षेत्र
कुब्जाम्रकमाहात्म्येऽग्नितीर्थकथनम् ॥ २० ॥ स्कन्द उवाच अथ तीर्थं शृणुष्वा
गवायव्यं तीर्थमुत्तमं कुब्जाम्रके महाभाग सर्वपापभयापहं यत्र वायुस्तपस्तेपे वं रामः
चवर्षसहस्रकं प्राप्तवांश्च तथा तत्र दिक्पालत्वं महायशा २ अस्मिन्कृतोरकोयस्त ६५

पुण्यात्मापितृतारकः दिव्यवर्षसहस्राणिस्वर्गलोकेमहीयते ३ यःकरोतितथास्नं
नंवाजपेयशतस्यच फलंप्राप्नोतिमनुजः स्वल्पमेतद्दशामिते ४ यस्तत्रत्यजतेप्रा
णान्वायव्येविजितेंद्रियः नसभूयोमहाराजजायतेनरलोकके ५ तत्रचिह्नंप्रव
क्ष्यामिवायव्यस्यमहामते तत्राश्वत्थस्यपत्राणिचलंतेवायुतेरिता ६ स्वनंतेचत
थातत्रह्रादृश्यांदृश्यतेमुने अन्यत्तत्रैवविख्यातंवासवंतीर्थमुत्तमं ७ तत्रचिह्नं
प्रवक्ष्यामियेनतज्ज्ञायतेशुभं पदानितत्रदृश्यंतेहस्तिनोवासवस्यतु ८ नित्यमाया
तितत्रैववासवोवस्तुसंवृतः तत्रस्नानेनसंयातिपुरुहूतपुरंशुभं ९ चन्द्रिकेति
समाख्यातानदीपरमपाविनी तत्संगमेनरःस्नात्वाचन्द्रलोकेमहीयते १० तत्रैवग
णपोनामभैरवोभीषणाकृतीः तत्रचिह्नंप्रवक्ष्यामिसिंदूराभातुमृत्तिकाः ११ यस्य
दर्शनमात्रेणनरोयातिपरांगतिं अन्यच्चतीर्थप्रवरंवारुणंवरुणास्पदम् १२

मा०पु० वारुणेनतपस्तप्तंशतंवैदिव्यवर्षकं प्राशंपापमहादेवात्तीर्थेस्मिन्वारुणोवरं १३ उ
पोष्यदशरात्राणिजस्त्यजेतत्रदेहकं सयातिपरमांल्लोकान्यावदाचन्द्रतारकं १४ स
६६ यातिरुद्रसदनंपुनर्जायेतभूमिप यत्कर्मक्रियतेतत्रतत्सर्वंशतसंज्ञकं १५ अ
थान्यत्तेप्रवक्ष्यामिवाराहंतीर्थमुत्तमं यत्रविष्णुःक्रोडरूपीशिलारूपेणसंस्थितः १६
तत्रवैस्नानदानाद्यैर्लभतेपरमंपदं ततोवैउत्तरेभागेधनुषांचचतुःशते १७ सप्त
सामुद्रकंनामतीर्थंविष्णुःसलोकदं अश्वमेधत्रयस्यात्रफलंवैस्नानमात्रतः १८
कुब्जाम्रकेपरंपुण्यंत्रिषुलोकेषुदुर्लभं भाग्येनयस्त्यजेत्प्राणान्नजन्मनाशादिवर्जितः
तत्रचिह्नंप्रवक्ष्यामिसप्तसामुद्रकेमहत् विमलंहितथागांगंदृश्यतेचित्रवन्मुने २०
क्षीरवर्णंकदाचित्तुकदाचित्पीतवर्णकं कदाचिद्दृश्यतेरक्तंतथामारकतप्रभं २१ एते रामः
नीमविधेश्चिह्नैर्ज्ञेयंतीर्थमिदंध्रुवं तत्रस्नानादिनाविप्रलभ्यंतेसर्वसिद्धयः २२ ६६

कुब्जाम्रकादुत्तरतस्त्वषीपर्वतउत्तमे ऋषयसिद्धगंधर्वास्तत्रसन्तिमहामुने २३
नानाविधानिलिंगानितत्रसंतिपराणिवै तस्योत्पत्त्यधरायांहिगंगायापश्चिमेतटे २४
तपोवनेमुनीनांतुयत्रसोमित्रिरुत्तमः भ्रात्राराज्येतथारामेनिहतेदशकंधरे २५ समा
ययौतपस्तप्तुंलक्ष्मणोलक्ष्मणान्वितः तस्मात्स्थलादधोभागेविलमस्तिमहत्तरं २६
तत्रशेषःस्वयंनित्यंवसतेनात्रसंशयः श्वेतवर्णःश्वेतविन्दुःकमलनेत्रःप्रदृश्यते २७
पुण्यात्मभिर्महाभागयेर्गतव्यंहरिप्रिये नारदउवाच लक्ष्मणेनतपस्तप्तंकिम
र्थंतत्रतीर्थके किंध्यानंचफलंतेनप्तुद्धेनपरमात्मना किमर्थंतत्रवसतेवासुकिः
सर्पनायकः २९ एतत्सर्वंसमासेनकथयस्वशिवात्मजः स्कन्दउवाच श्रृणुनारद
वृत्तांतंपापघ्नंसर्वकामदं ३० श्रुत्वापियन्महाभागमुच्यतेसर्वकिल्विषैः पुरारामो
महातेजाःपितुराज्ञांसमाश्रितः ३१ सीतयासहितोभ्रात्रालक्ष्मणेनसमन्वितः ययौ

मा०पु० वैदंडकारण्येनानामुनिगणान्विते ३२ पंचवट्यांमहाभागाल्लक्ष्मणमयीकुटी
६१ कारयामासभगवान्निवासार्थंमहामतिः ३३ तत्रवैवसतस्तस्यरामस्यविदितात्म
नः रावणस्यस्वसातस्यनाम्नाशूर्पणखाययौ ३४ दृष्ट्वातौभ्रातरौतत्रकंदर्पाविवरू
पिणौ कामस्यवशमापन्नाचकमेतत्प्रियंह्यहं ३५ रामंसन्निधिंगत्वाविकरांगीघटोदरी स्व
विहस्यवचनंप्रोचेरामंदशरथात्मजं ३६ भोभोपुरुषशार्दूलभुवनेत्वत्समोनहि
आगच्छत्वंमयासार्द्धंगिरीणांकंदरेषुच ३७ संगमेषुनदीनांचवनांतेषुसमन्तेच
क्रीडांचत्वंमयासार्द्धंयौवनंतेनिवर्त्तते ३८ चतुर्द्दशसहस्राणामधिपौखरदूषणौ
भ्रातरौरामवीर्याढ्यौजनस्थाननिवासिनौ ३९ लंकेश्वरेणप्रहितौभ्रात्रामेहिंसितुंमुनीन्
अन्यथात्वांभक्षयिष्येअनयासहमानुषः ४० इत्युक्तंसहसारामस्तदाभगवतोत्तमउ
वाचविहसन्वाक्यंसौमित्रिंवरयस्वभो ४१ अहंकलत्रवानस्मिसपत्नीकोवरानने रामः ६१

एवमुक्तास्तु रामेण लक्ष्मणं च तथाब्रवीत् ४२ लक्ष्मणोपि विहस्यैनामुत्तरं प्रोक्तवा
न्करु ततः क्रुद्धा सूर्पणखा तान्हंतुमुपचक्रमे ४३ इति तच्चेष्टितं दृष्ट्वा रामो राजीवलो
चनः चकर्त्त नासां कर्णौ च तस्यास्तत्र महामते ४४ रुदंती रुधिरासिक्ता ययौ शीघ्रं ख
राश्रमं खरं च दूषणं चैव आनयामास सैनिकौ ४५ निहतो राक्षसो तेन रामेण विजनस्थ
ले सापि कर्म महद्दृष्ट्वा ययौ लंकां विनासिका ४६ रुधिरप्लुतसर्वांगा जगाद परुषं सदि
मतो सि राक्षसश्रेष्ठ भ्रातरो निहतौ तव ४७ जनस्थाने मनुष्येण स्त्रीसहायेन रावण
खरश्च निहतस्सद्यो दूषणस्त्रिशिरास्तथा ४८ अहं च विकिता तेन कृता लक्ष्मायसंमु
खी स्त्रीरत्नं च त्वदर्थं हि जानेत्तमहमुद्यता ४९ किं करोषि मम भ्रातर्हंतुं त्वां समुपस्थि
तः स्वसुस्तद्रुदितं श्रुत्वा रावणः क्रोधमूर्छितः ५० जगाम सहसा तत्र जनस्थानेम
हामते अहरत्तत्र हेमेन छद्मयित्वा मृगेण तं ५१ रामं राजीवपत्राक्षं सीतां नीत्वा गृहं ययौ

सां॰पु॰ रामोपितन्महाश्चर्यं दृष्ट्वा विस्मयमाययौ ५२ विलपन्प्रययौ भ्रात्रा ऋष्यमूके महागिरौ
सुग्रीवेण तथा शख्यं कृत्वा वैचाग्निसाक्षिकं ५३ हत्वापि वालिनं तत्र स्थापयित्वान्यषास
६८ ने सुग्रीवं च तत्पातेन ससैन्येन हनूमता अन्यैश्च कपिभिः सार्द्धं ययौ लंकां महायशाः
चन्द्रवत्तुमुलं युद्धं नरवानररक्षसां ५५ लंकायां विविधैः शस्त्रैस्तथास्त्रैरुग्रदर्शिभिः नि
कुंभिलाशिलायांतु तप्यमानं महत्तपः ५६ मेघनादं स सौमित्रिर्विषमस्थं महायशाः दं
संछाद्य शरधाराभिर्विभीषणसहायवान् ५७ निजघान महोरस्कं शार्दूल इव कुंजरं
रामोपि कपिभिर्युक्तो हत्वा राक्षसमं विराः ५८ पुत्रान्संबंधिनश्चैव निर्जघान दशाननं
अत्र संस्थापयामास तद्द्वारमनिंदितं ५९ लंकाधिपत्ये विप्रर्षे मंदोदर्यास्तथैव च
इति तद्वै महत्कर्म कृत्वा रामो महायशाः ६० लक्ष्मणश्च महाबाहुर्दृष्ट्वा सर्वान्दिवौकसः राम:
तथा दशरथं चैव पितरं स्वविमानगं ६१ शुद्धिं दृष्ट्वा तु सीताया वह्नौ मानुषविग्रहः ६८

विमानःपुष्पकमारुह्यसविभीषणवानर ६२ सीतयासहितश्चैवयोध्यायांचसमाययौ
तत्रासनेशुभेपित्र्येरामेराज्यंप्रशासति ६३ राजयक्ष्मालक्ष्मणंचजगृहेगृहसंस्थितं
तथाविधंलक्ष्मणंहिरोगग्रस्तंसमीक्ष्यसः ६४ रामोनाममहातेजाश्चिंतयामासराघवः
पप्रच्छचवशिष्ठंवैस्वगुरुंब्रह्मपुत्रकं ६५ केनवैकर्मणाचैमंराजयक्ष्मागृहीतवान्
इतितेसंशयंदेवछिंधिधीरवरप्रभो ६६ इत्युक्तोमुनिराड्विप्रःकथयामासपातकं
इन्द्रजिद्वधजनितंघोररूपंमहत्तरं ६७ यस्मादनेनतपतःशिरश्छिच्छेदलक्ष्मणः यु
द्धाहेविनिहतस्यब्रह्मवंशस्यरक्षसः ६८ तस्मादयंमहातेजाराजरोगग्रयीहितः तपस
पत्तुकुत्राग्रेलक्ष्मणोलक्ष्मिवर्द्धनः ६९ ततोयंभविताशीघ्रंराजयक्ष्माविवर्जितः त्वं
चराममहाबाहोप्रायश्चित्तंतपात्मकं ७० कुरुष्वरावणवधजन्यपापापनुत्तये इति
श्रुत्वामहातेजाविस्मयाविष्टमानसः ७१ पप्रच्छगुरुमासीनंवशिष्ठंवाग्विदांवरम्

मा०पु० श्रीरामउवाच ब्रह्मवंशसमुत्पन्नरावणस्यवधान्मुने ७२ कथंमेपातकंजातंप्रायस्य
दुरितात्मनः गोविप्रहतकस्यापिदेवानांचैवद्रोहिणः ७३ हर्त्तुश्चपरदाराणांपरस्येव
६९ धनादिनां कथंतन्मात्कृपापंलह्वोस्याचाकृत्ववर्तिनः एतन्मेसंशयंछिंधिसर्वज्ञोसि
यतोमुने ७५ इतिस्कान्देमायालेवैकुंठाश्रमकमाहात्म्येलक्ष्मणोपाख्याने०॥
२१ स्कन्दउवाच शृणुराममहाबाहोब्राह्मणानांमहामते माहात्म्यंसर्वपापघ्नंतापत्र
यविनाशनं १ ब्राह्मणाजंगमामूर्त्तिःश्रीविष्णोःपरमात्मनः अतएवहिविख्यातास्ति
तिदेवामहामते २ येषांवैदर्शनात्सद्योनश्यन्तेपापराशयः ब्राह्मणानांचसंचारोयत्र
तिष्ठतिसर्वदा ३ तत्रसर्वाणितीर्थानिवसन्तिनितरांसदा भोजनीयांश्चयत्नेनयद्य
दिच्छन्तितेनते ४ यत्किंचिद्दुर्लभंवस्तुब्राह्मणेभ्योददेत्तुतत् ब्राह्मणानांचसंगत्या
ब्राह्मणानांचपूजनात् ५ तर्पणाद्ब्राह्मणानांचपितॄणांतारणंभवेत् तस्मात्सर्वप्रय रामः
६९

तेनन्नरोब्राह्मणमाश्रयेत् ६ ब्रह्मवीर्य्यसमुत्पन्नोवरजातिषुवाविप्रो सोपिदेवोमहात्मा
विज्ञेयोभवतिस्तभिः ७ ब्राह्मणस्यपदांगुष्ठेदक्षिणेनवपुंगवः सर्वतीर्थानिपुण्या
निवसंतिनिरंतरंसदा ८ यावंतिविप्रपादेषुरजांसिशिरसानरैः धार्यंतिनरशा
र्दूलतावद्वर्षसहस्रकं ९ स्वर्गलोकेवसेन्मर्त्योविमानवरमास्थितः यावंत्यःगणिका क
देहेपतंतिचरणांबुनः १० तावद्वर्षसहस्राणिब्रह्मलोकेमहीयते श्राद्धेचब्राह्मणा
यत्रनसंतिनृपसत्तम ११ पितरश्चैवतेषांचनरकेनिवसत्यलं मूर्खाअपिमहाभा
गाब्राह्मणापुण्यसंचया १२ किंपुनश्चैवविद्वांसोवेदवेदांगपारगाः धन्यास्तेपुरुषा
लोकेब्राह्मणानांचयेप्रिया १३ येविप्रपूजाकामार्थानतेषांपुनरागमः तेसर्वेनिर्ज्जरा
ज्ञेयाब्राह्मणान्प्रणमंतिच १४ विप्रपादोदकंपुण्यंसर्वव्याधिविनाशनं धन्यंवैकीर्त्ति
नंविष्णोःधन्यंब्राह्मणपूजनं १५ विप्रपादोदिकंधन्यंधन्यंगंगाजलंस्मृतं ब्राह्मणानां

मा०पु० प्रसादाद्वै लभंते सर्वसिद्धय: १६ ब्राह्मणानां प्रकोपेन दह्यंते ब्रह्मकोटय अविद्यो
७० पि महाराज नावमान्यो द्विज: सदा १७ अविद्यो वा सविद्यो वा ब्राह्मणो भगवत्तनु सं
सारतापतप्तानां भेषजं ब्राह्मणा विभो १८ यावद्ब्राह्मणपूजास्ति यावद्गंगाधरा जले
यावद्देहमयो घोषस्तावन्नो विशते कलि: १९ ब्राह्मणोस्ति परं तत्त्वं ब्राह्मणोस्ति परं तप
ब्राह्मणोस्ति परा विद्या नास्ति ब्राह्मणत: क्वचित् २० अविद्यं ब्राह्मणं कोपि सविद्यं वा
नराधिप योवमन्यति दुष्टात्मा तस्यार्द्धिर्नश्यति क्षणात् २१ तस्मात्सर्वप्रयत्नेन नाव
मन्ये द्विजातिकं ब्राह्मणानां प्रकोपेन नहुषोऽजगरतां गत: २२ तस्मात्सर्वप्रयत्नेन
ब्राह्मणं नैव कोपयेत् वेदलेशोस्ति यत्र श्रीशास्त्रलेशोपि यत्र च २३ तस्य दर्शनमा
त्रेण नश्यंते पापराशय: वेदविन्मानुषो विप्र: सर्वे यत्र प्रगच्छति २४ गच्छति तत्र राम:
निधय: सेवान्यतितरां सद्या यत्रास्ति शास्त्रवेत्ता हि तत्र विष्णु: सनातन: २५ पुराणसं ७०

हिताबक्तायत्रसंचरतेद्विजः तत्रैवसर्वतीर्थानिदेवाःसर्वेप्रतिष्ठिताः २६ ब्रह्महत्या
दिपापानांब्राह्मणदेवनिष्कृतिः गतःपापाश्चमर्त्त्यायेतथाश्चैवगतायुषः २७ द्विषंति
ब्राह्मणांस्तेवैयेबानरकगामिनः आसन्नमरणास्तेयाहतश्रीकाश्चराघव २८ येद्वि
षंतिमहाभागभिषक्कालनसत्तमान् यस्यभाव्यापरासिद्धिर्यस्यभाव्यामहार्थदा २९
यस्यभाव्यंपरंज्ञानंतस्यब्राह्मणसंगतिः तेनतप्तंहुतंतेनतेनजप्तंमहत्तरं ३० पू
जितायेनविप्रेशाःसत्यमेवनराधिप आधिव्याधिभयंनैवभक्त्यायत्रद्विजार्चनं ३१
यथासर्वेषुदेवेषुश्रेष्ठोवैगरुडध्वजः वेदेषुचतथासामशास्त्रेवेदांतउच्यते ३२ पु
रीणांचतथाकाशीक्षेत्राणांपरमंस्थिदं हिमवान्पर्वतश्रेष्ठोयथापशुषुधेनव ३३ त
थासर्वपदार्थेषुब्राह्मणाःपरिकीर्त्तिताः इहचैवपरत्रापिब्राह्मणास्तारकाःस्मृताः ३४
केचिदैहिककर्माणःकेचित्पारस्तुखप्रदा विप्रेतरोमहाभागयदिशास्त्रविशारदः ३५

मा०पु० ब्राह्मणाश्च तथा भूर्व्वस्तस्माच्छ्रेष्ठतमो मतः ब्राह्मणांश्च तथा पूज्य यत्कर्म्म प्रकरोति हि ३६
अपि धानात्कृतमपि सम्पूर्णं स्यादिति स्मृतिः अपृष्ट्वा ब्राह्मणान्नैव स्वयं कर्म्म प्रकुर्व्वति ३७
७१ तत्कर्म्म निःफलं ज्ञेयं मायासेनापि यत्कृतं दंभं करोति विप्रेषु विद्यायां यो नराधमः ३८ स
याति नरकं घोरं यावदाभूतसंप्लवं यो निन्दति महाराज ब्राह्मणान्ब्रह्मतत्परः ३९ कु
लं तस्य क्षयं याति स ततो नरकमाप्नुयात् विद्ययाज्जेति यो विप्रान्स वै नरकमश्नुते ४०
ब्राह्मणार्थं यस्य वित्तं ब्राह्मणार्थं पराक्रमः स एव पुरुषो लोके पुण्यात्मा नात्र संशयः ४१
चाण्डालीष्वपि संजाता ब्राह्मणानां हि वीर्य्यतः तेप्यवध्या महाराज किं तु विद्वान्सुकर्म्मकृत्
पौलस्त्यपुत्रो भगवान्हतार्थे हे त्वया विभो रक्षणार्थं ब्राह्मणानां गवां चैव महामते ४३
अलेपस्यापि ते राम लक्ष्मणस्यापि पातकं लोकानुवृत्त्यैव वशं कर्त्तव्यं पापसंक्षयं ४४ रामः
कुम्भकात्परं सेतुं ब्रह्महत्यानिवारणं नास्ति राघवशार्दूल पृथिव्यां पुण्यदं महत् ४५ ७१

लक्ष्मणेन च गंतव्यं यथा तत्र महीपते ४६ इति स्कान्दे मायाक्षेत्रे कुब्जाम्रकमाहात्म्ये
लक्ष्मणोपाख्याने ब्राह्मणप्रसंवादो द्वाविंशोध्यायः॥२२॥ स्कंद उवाच इत्युक्तो
वै वशिष्ठेन रामो धर्मभृतांवरः कुब्जाम्रके महाक्षेत्रे जगाम च सहानुजः १ नारद उवाच
लक्ष्मणेन तपस्तप्तं कथं कुब्जाम्रके महत् कस्मिन्प्रदेशे भगवान्कानि तीर्थानि तद्वद २
रामेणापि कृतं किं वा कस्मिन्क्षेत्रे कृतं तपः एतत्सर्वं समासेन कृपया वद मे प्रभो ३ स्कं
द उवाच सर्वं ते वच्मि विप्रेश महद्ज्ञानमाधानं लक्ष्मणेन यथा तप्तं ब्रह्महत्यानिवा
रणे ४ रामेणापि परं क्षेत्रे कृतं पापप्रणाशनं भारापनुत्तये भूम्याः प्रार्थितस्य परात्मनः
कृतं दुष्टविनाशस्य रक्षणार्थं भवादृशां श्रीरामस्य महाबाहो लीलामानुषरूपिणः ६
पुराणपापादिकं चैव नैव दोषविकल्पना विशेषतोस्य पापस्य रावणस्य दुरात्मनः ७
गोविप्रहंतुर्विप्रेश मारणे नास्ति यद्यपि पातकं तदपि प्राप्तं लोकचेष्टानुसारिणाम् ८

प्रायश्चित्तं कृतं तेन लक्ष्मणेन च नारद कुब्जाम्रकोत्तरे भागे गव्यूत्यर्द्धे तथार्द्धके ९ क्रोशे
गंगातटे पश्चान्नानामुनिगणान्विते अद्यापि तत्र देशो हि लक्ष्मणस्यास्य तेपतः १०
सर्वद्रूपेण शेषांशो वर्त्तते भगवत्प्रिय शिवमाराधयामास वर्षद्वादशसङ्ख्यया ११
निराहारो महातेजाः शिवसन्यस्तमानसः जजाप परमां विद्यां षडर्णां भक्तितत्परः १२
वाय्वाहारो वर्षशतं शतं पत्रफलाशनः तस्थावेकेन पादेन शिवभक्तो जितेन्द्रियः १३
ततः शिवो महाभाग प्रत्यक्षं तस्य नारद बभूव सहसा तत्र कान्तिव्याप्तदिगन्तरः १४
वृषसंस्थोर्द्धचन्द्रेण संशोभितललाटकः व्याघ्रचर्मपरीधानो व्यालयज्ञोपवीतवान् १५
उमानीतार्द्धवपुषस्त्रिनेत्रो गजकृत्तिधृक् उवाच वचनं तत्र सौमित्रिं शिववत्सलः १६
शिव उवाच साधु साधु महाभाग सौमित्रे नन्दवर्द्धन गतं ते पातकं तेन मत्प्रसादेन ल
क्ष्मणः १७ अस्मिन्स्थले स कृत्वा नान्ब्रह्महत्यात्रिकोटिभिः मुच्यन्ते किमु त्वं शुद्धो मुनि

हिंसकहिंसकः १८ शुद्धस्त्वंसर्वपापेभ्योदेहजेभ्योमहाशय गच्छगच्छस्वकेस्थानेकु
रुराज्यंसुखानिच १९ तवोवैराजयस्मातेदेहतःशुभगेहतः त्वन्नाम्नेदंपुरंख्यातमेतल्ल
सितंचैवभविष्यति २० अहंचभगवान्नित्यंलक्ष्मणेश्वरतांगतः तिष्ठामिभक्तिरोन्नृणां
मतिपुष्कृतिनोतथा २१ स्कन्दउवाच इत्युक्त्वाचततोदत्वालक्ष्मणायवरंतदा तत्रैवां
तर्द्धधेरुद्रोभक्तगम्योदुरासदः २२ सोपिलक्ष्मणनामावैविष्णोरंशोमहात्मनः स्थितवां
स्तत्रसंवाशेनपूर्णोविश्वम्भरस्तुतः २३ तत्रैववामभागेतुशिवोज्ञानमतिःप्रभुः नाम्ना
लक्ष्मेश्वरःख्यातोदर्शनात्सर्वपापहा २४ गंगायाःपश्चिमेतीरेयत्रासिंधूरवर्णिका मू
र्त्तिकावर्त्ततेविप्रतत्रलक्ष्मणकुंडकं २५ तत्रस्नात्वाचजप्त्वाचफलानन्त्यंलभेन्नरः
तस्यवामविभागेतुमुनिकुंडमितिस्मृतं २६ तत्रस्नात्वाशुभांल्लोकान्याप्नोतिपरमंपदं
तत्रविल्लोगंदाविप्रनिहंत्राकुंडचेतसा २७ विल्लुनापह्नवदमनेतत्रास्तिचिह्नितज्जले

मा०पु० इन्द्रकुंडमितिख्यातं तत्रैव भवमोचनम् २८ यत्रेंद्रस्तपसा वृत्रं निजघान महामुने
७३ तस्य वामे महत्तीर्थं वायुकुंडमिति स्मृतं २९ स्नात्वा तत्र महाभाग शत गोदानजं फलं
तस्मिन्नेव स्थले रम्ये नन्दी नाम्नी शिलाशुभा ३० स्पर्शमात्रेण यस्यास्तु मुच्यते सर्वपात
कैः नन्दीकुंडमिति ख्यातं सर्वतीर्थेषु चोत्तमं ३१ तत उत्तरदिग्भागे नाम्ना धर्मधराधरः
धर्मधारेति विख्याता सर्वपापक्षयंकरी ३२ आयाति पर्वतश्रेष्ठाद्भूमौ ख्या धर्मवर्द्धिनी
तस्यां स्नानं नरो भक्त्या वाजपेयफलं लभेत् ३३ धर्मस्थाने महादेवो वर्त्तते लिंगरूपधृक्
यः स्नापयति तल्लिंगं मंडलं भक्तितत्परः ३४ सर्वान्कामानवाप्नोति जलदानेन नारद अ
थान्यत्तत्प्रवक्ष्यामि पीठं परमदुर्लभं ३५ यत्रैकरात्रं लभते सिद्धिं परमदुर्लभं यत्रैकरा
त्रकमात्रं लभते सिद्धिं परमदुर्लभां ३६ माहेश्वरीति विख्याता सर्वसिद्धिप्रदायिनी रामः
यत्र रुद्रः स्वयं साक्षाद्देवैः सन्निहितः सदा ३७ माहेश्वरीति नाम्ना वै कल्पवर्णा महामुने ७३

तस्यैवदर्शनाद्यातिरुद्रलोकंदुरासदं ३८ आनागतीर्थतोविप्रतथाहेमवतीतटं मा
यात्क्षेत्रमिदंख्यातंसर्वक्षेत्रोत्तमोत्तमं ३९ यस्यैकवारमपियोदर्शनंप्रकरोतिहि को
टिजन्मकृतैःपापैर्मुच्यतेनात्रसंशयः ४० धन्यानांवसतिर्यत्रक्षेत्रराजेमहामुने न
तेषांपुनरावृत्तिःकल्पकोटिशतैरपि ४१ अस्यक्षेत्रस्यमाहात्म्यंकोवावर्णयितुंक्षमः
श्रीविष्णोर्यत्रसान्निध्यंईश्वरस्यतथैवच ४२ दक्षादिभिर्मुनिवरैःकृताःक्रतुवरायतः
एतत्क्षेत्रसमंक्षेत्रंत्रिषुलोकेषुदुर्लभं ४३ मृतायत्रमहाभागप्रयांतिपरमंपदं ति
र्यग्योनिगताश्चापितथास्थावरतांगता ४४ प्रयांतिभवनंविष्णोस्त्यक्तदेहामहामत
शृणुविप्रपुरावृत्तंचित्रंपरमकंतथा ४५ यथात्रप्रवरस्थानेरूपव्याघ्रोमहामुने य
यौतुःपरमांसिद्धिंप्राप्तेचापरजन्मनि ४६ इतिहासमिमंश्रुत्वासर्वपापैःप्रमुच्यते
धर्मक्षेत्रेकुरुक्षेत्रेबभूववणिजांवरः ४७ ब्रह्मदत्तइतिख्यातःकुवेरइवचापरः

मा०पु० एकदासमहाभागकंठेधारोप्यड्यकं ४८ सुवर्णमुक्तारत्नानिप्रवलानिचनार
७४ द तीर्थयात्राप्रसंगेनदेवालकुञ्जामकेययौ ४९ व्यापारेश्चकृतंतेनतीर्थयात्राचवै
तथा गतोगेहेद्धस्मदत्तस्तस्यैकोवृषभस्तथा ५० सोर्थाच्चैवपरिभ्रष्टोभूयःकुञ्जामूकं
ययौ देवालयसमीपेतुस्थितवान्कतिचित्समा ५१ निर्माल्यफलपत्राणिभक्षयन्वृषभो
मुने दिनेस्वयंवनंयातिरात्रावायातितत्रवैः ५२ एवंहिवसतस्तस्यतत्रदेवगृहाद्बहिः
व्याघ्रश्चैकोरिपुर्जातोदृष्ट्वापुष्टशरीरकं ५३ तत्प्रसंगाच्चतत्रैवसमायातिघांसया जि
एवंतयोर्महान्वैरंबभूवमुनिपुंगव ५४ वृषभःसोपिपुष्टांगोनतंगणयतिक्वचं
तीक्ष्णश्रृंगोमहोच्चैवेककुद्मान्दृढविक्रमः ५५ सहसासोपिव्याघ्रश्चवृषभंनजिघांसति
एकदामुनिशार्दूलगतोरण्येमहावृष ५६ तृणानिखादितुंविप्रनिर्जनेतिभयंकरे राम:
महावराहसंछन्नेसरीसृपनिषेविते ५७ व्याघ्रचर्क्षशताकीर्णेदुर्गमेखड्गसेविते ७४

तयायुद्धंसमभवन्महद्वृषभव्याघ्रयोः ५८ वृषश्चतंमहाभागशृंगाभ्यांव्याघ्रकंतदा
दृधारश्चतथाव्याघ्रमोचिक्षेपप्रबलंखलु ५९ उत्थायसहसासोपिवृषंकष्टाज्जघानह
सोपिसिंहोमहातेजाविद्धोराद्वृषभेणह ६० ममारचमहाभागतस्मात्कुब्जाम्रकेवने
अवन्तीविषयेतौचकुब्जाम्रमिनिवैभवात् ६१ पितापुत्रौराजपुत्रौवभूवतुरनिन्दितौ
पूर्वजन्मविरोधेनजातौतत्रविरोधिनौ ६२ वृषोराजावभूवाथसिंहोवैराजपुत्रकः
एकपुत्रस्तदाराजाकिंचित्पुत्रंनभाषते ६३ सोपिराजाकुमारस्यराज्ञोनंनचपश्यति
प्रजायाश्चानुरोधेनकुमारंचजिघांसति ६४ राजास्मरतिवृत्तांतंपूर्वजन्मभवंखलु
इतीतयोर्महाभागदैवयोगात्स्मृन्मतिः ६५ कुब्जाम्रकंमहातीर्थंगंतुंराज्ञोमहात्मनः
सकुमारोमहाराज्ञोनिजगामपदैर्युतः ६६ ययौहिमाद्रिनिकटेमायापुर्यांमहामते
यावत्सविशतेराजाकुब्जाम्रेसेत्रउत्तमे ६७ नानामुनिगणाकीर्णेदेवगंधर्वसेविते

मा०पु तावत्तस्मारपुत्रोपिवृत्तान्तंपूर्वजन्मजं ६८ वैरस्यकारणंस्वस्यराज्ञश्चैवमहामते
७५ तस्मिन्नेवक्षणेतौचनिर्वैरौहिबभूवतुः ६९ क्षेत्रस्यास्यप्रभावेनमुग्धौचैवतथामुने
तत्रैवस्थितवंतौच किंचित्कालंमहामतीः ७० कालेनक्षयमापन्नौयत्रगत्वानशोचति
इतिवैरस्यमाश्चर्य्यंमृगेन्द्रवृषयोर्वने ७१ तिर्य्यग्योनिप्रगंतव्यौमूढयोर्वद्धवैरयोः
राज्यंचैवतथाप्राप्तंमोक्षश्चापरयन्मुनि ७२ कुष्ठान्धकेमूलोविप्रविप्रहत्यायुतोपिवा
मोक्षंप्राप्नोतिसंततंकुष्टीवामृतसंततिः ७३ अन्यान्यच्चात्रपरमंतीर्थंवाराहसंज्ञितं
धरण्यायत्रनियतंसंस्कृतोभगवानज ७४ तस्मादिदंपरंक्षेत्रंवाराहंनामविश्रुतम्
यत्रब्रह्मादयोदेवास्तपस्तेपुःसुदारुणं ७५ वाराहतीर्थमहिमाकेनवर्णयितुंक्षमः
तत्रैकापरमामूर्तिःशिलारूपामहात्मनः ७६ तच्छिलास्पर्शनाद्देवविष्णुलोकेवसेच्चिरं ...मः
स्वर्ण्यपुत्रीनदीतत्रसमाख्यातिमहामते ७७ गालवेनपुरास्वर्ण्यःसमाराधितईश्वरः ७५

प्रसन्नश्चाब्रुवीत्सूर्यौवरंवरयगालव: ७८ सोब्रवीद्देहिभगवंस्तवपुत्रीतुयास्मृता
यमुनेतिसमाख्यातानदीपरमपावनी ७९ सासमायातुसततंगंगायांसंगताभवेत्
तीर्थराजप्रयागाख्यसमंतीर्थंभवत्विति ८० अत्रस्नास्यंतियेमर्त्यास्तेप्रयांतुपरंपदं
तथचात्रस्थितिंचास्तुसर्वतीर्थेषुचोत्तमे ८१ सूर्यस्थापितयेत्युक्त्वाददौवरमनुत्तमं
यमुनाचमहाभागकालयाचात्रसंस्थिता ८२ तस्यास्तुसंगमेपुण्येप्रयागात्कोटिसङ्गुके
स्नात्वातत्रनरोभक्त्याशिवसायुज्यमाप्नुयात् ८३ तत्रैवसूर्यकुंडाख्यंतीर्थंपरमपावनं
ततउत्तरवायव्येशिवोयज्ञेश्वरःप्रभुः ८४ विष्णुनास्थापितोयत्रयज्ञार्थोविघ्ननाशने
यत्रविष्णुश्चक्ररूपीतत्रैवेदंलिंगमुत्तमं ८५ इदंपरमकंपीठंसर्वसिद्धिकरंनृणाम्
यत्रार्च्चयासकृदपिलभतेयद्यदिच्छति ८६ तस्यवामप्रदेशेहिशिलाविष्णुकलेवरा
यस्यांकृतेहृषीकेशस्त्रेतायांभरतोहरिः ८७ द्वापरेवामनोदेवोभूयश्चभरतःकलौ

मा०पु० तस्यसंदर्शनादेवमहापातककोटय: ८८ नश्यन्तिब्राह्मणश्रेष्ठसिध्यंतिसर्वसिद्धय:
७६ एतन्नाम्नैवसकलंप्राप्नोतिनिजवांछितं ८९ इतितेकथितंदेवमाहात्म्यंजगतीशितु:
हृषीकेशाश्रमेपुण्येयथारेभ्योह्यनुग्रहं ९० कुब्जाम्रकस्यमाहात्म्यंय:शृणोतिमहामते
सोपिवैकुंठनिलयेयातिब्रह्मसनातनं ९१ यइदंपठतेनित्यंमहापातकनाशनम् मा
द्तेत्रिदिव:सार्द्धंपितृभि:सहनारद ९२ अस्यक्षेत्रस्यमहिमावक्तुंकेनापिशक्यते सं
क्षेपेणमयाख्यातंपापघ्नंसर्वकामदं ९३ यइदंपठतेश्राद्धेशृणोतिचमहामते तारिता:
पितरस्तेनसत्यमेवनसंशय: ९४ इतिश्री[illegible]स्कन्दपुरा[illegible]केदारखंडेमायापुर्यांतर्गतकुब्जाम्र
कमाहात्म्ये[illegible]लक्ष्मणोपाख्यानेत्रिविंशोध्याय:॥२३॥मायापुरीमाहात्म्यंसमाप्तम्

राम:
७६